वर्षम् – ७१
अङ्कः – २
मार्गशीर्षमासः
विक्रमाब्दः २०७७
युगाब्दः ५१२२
दिसम्बर, २०२०

ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

एकस्याः प्रतेः १५/–
वार्षिक–शुल्कम्
१५०/–
पञ्चवार्षिकशुल्कम्
७००/–
आजीवनसदस्यता
(१५ वर्षाणि)
२१००/–

प्रकाशन प्रत्येक माह की 1 तारीख




गीताया भाष्यकारोऽयं महाराष्ट्रधरामणिः।
सन्तज्ञानेश्वरः पूज्यो जयन्ती यस्य पावनी॥

## विषय-सूची



| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | सम्पादकीयम् | प्रोफेसर श्रीकृष्णशर्मा | ४ |
| २ | शून्यशोकैकादशी | प्रोफेसर ताराशंकरशर्मा पाण्डेयः | ५ |
| ३ | व्याकरणदर्शनस्य शब्दब्रह्म | विजयकुमारः | ६ |
| ४ | अध्यापकेभ्योः वंशानुक्रमवातावरणयोर्महत्त्वम् | बोलतीराम मीना | ८ |
| ५ | व्याकरणशास्त्रस्यानुषङ्गिकप्रयोजनानि | डॉ. उषाकिरणयादवः | १२ |
| ६ | संस्कृतसमाचाराः | प्रबन्ध सम्पादकः | १५ |
| ७ | व्यापारिकवास्तुविमर्शः | श्रीकृष्णचन्द्रशर्मा | १६ |
| ८ | श्रीरामः परमेश्वरः | सोहनलाल शर्मा | २० |
| ९ | आध्यात्मिकसुभाषितानि ( केनोपनिषदः ) | डा. नाथूलालसुमनः | २४ |
| १० | अस्माकं गुरवः | वेणीमाधव गो. धर्माधिकारी | २५ |
| ११ | पुस्तकसमीक्षा | म.म. देवर्षिकलानाथशास्त्री | २६ |
| १२ | नारी-स्तम्भः | डॉ. राजेश्वरी भट्टः | २८ |
| १३ | प्रेरकप्रसङ्गशतकम् | श्रीमती आराधना धर्माधिकारी | ३० |
| १४ | आयुर्वेद-स्तम्भः | प्रो. बनवारीलालगौडः | ३१ |



### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु– **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी–15, न्यू कॉलोनी, जयपुर–302001**

**दूरभाषः 0141–2379014, मो. 9783105699**

**(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें– प्रबन्ध सम्पादक)**

ISSN2249-698X

।। श्रीशः ।।

# भारती

## संस्कृत-मासपत्रिका

संस्थापकौ
स्व. उमाकान्तकेशव आप्टे ( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
श्रीश्यामशरणदेवाचार्यः
( निम्बार्कपीठं सलेमाबादः )
स्वामी रामभद्राचार्यः
( चित्रकूटः )
स्वामी अवधेशानन्दगिरिः
( हरिद्वारम् )
महन्तः गोविन्ददेवगिरिः
( पुणे )
स्वामी राघवाचार्यवेदान्ती
( अग्रपीठं रेवासा )
स्वामी संवित् सोमगिरिः
( बीकानेरम् )
महन्तः प्रतापपुरी
( तारातरामठं बाडमेरम् )
श्रीदामोदरदासमोदी ( जयपुरम् )

सम्पादकमण्डलम्

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्रोफेसर श्रीकृष्णशर्मा

प्रबन्धसम्पादकः
सुदामा शर्मा

सहसम्पादकौ
प्रोफेसर सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

सहायकसम्पादकः
डॉ. स्नेहलता शर्मा

भारतीयसंस्कृतप्रचारसंस्थानम्

अध्यक्षः
प्रोफेसर शङ्करप्रसादशुक्लः

उपाध्यक्षौ
डॉ. नाथूलालसुमनः
डॉ. नन्दसिंहनरूकाः

सचिवः
डॉ. सुधीरकुमारशर्मा

सहसचिवः
कृष्णकुमारशर्मा

व्यवस्थापकः
राजीवदाधीचः
9352030291

कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com
वेबसाईट : www.bhartipatrika.org

वर्षम् 71 अङ्कः -2
मार्गशीर्षमासः
विक्रमाब्दः 2077
दिसम्बर, 2020

एकस्याः प्रतेः 15/-
वार्षिकशुल्कम् 150/-
पञ्चवार्षिकशुल्कम् 700/-
आजीवनसदस्यताशुल्कम् 2100/- ( 15 वर्षाणि )

सम्पादकीयम्

# प्रत्यावर्तितो व्याधिः 'कोरोना' इति नामभृत्

...✍ प्रोफेसर श्रीकृष्णशर्मा

'कोरोना' इत्यस्यापरस्तरङ्गः (Second Wave) विश्वस्मिन् जगति तीव्राघातेन वितनुते। भारतवर्षेऽपि कोरोना-विस्फोटः भीषयते लोकान्। अत्र द्वितीये तरङ्गे (Second Wave) राजस्थान-हरियाणा-उत्तरप्रदेश-दिल्लीप्रभृतिप्रान्तेषु, पूर्वापेक्षया कोरोना-विस्फोटस्य भयावहा स्थितिरवलोक्यते। राजस्थाने जयपुर-जोधपुर-जनपदयोर्विकटा स्थितिर्वर्तते। दिनानुदिनं सक्रियरोगिणां (Active Cases) भूयसी संख्या वर्धते। दिङ्मात्रम् उदाह्रियते-राजस्थाने 16-11-2020 दिनाङ्के एकस्मिन्नेव दिवसे 1725 संख्यकाः संक्रमिता रोगिण आसन्, सैव संख्या 22/11/2020 दिनाङ्के 3260 परिमितां संख्यामगमत्।

अतः सर्वकारेण रात्रिकालिकं (सायं 8 वादनतः प्रातः 6 वादनं यावत्) 'गृहावस्थानम्' (Curfew) इत्युद्घोषितम्। वैवाहिकादिमंगल-कार्येष्वपि दृढतराः प्रतिबन्धाः समादिष्टाः। शतसंख्यक-(100) जनेभ्योऽधिका आयोजनस्थले समवेताः न भवेयुः। उल्लङ्घ्यते चेत् 25000/- रुप्यकाणाम् अर्थदण्डो विधास्यते। मुखाच्छादकं (Mask) विना कोऽपि विचरिष्यति चेत् 500/- रुप्यकैर्दण्डयिष्यते। यावद् 'गव्यम्' (Vaccine) नोपलभ्यते, मुखाच्छादकं (Mask) एव प्रजाजनेभ्यः सुरक्षोपायो, नाऽन्यः पन्थाः विद्यते त्राणाय इत्येव चिकित्सकीयः परामर्शः।

इदानीं (22.11.2020 दिनाङ्कं) यावत् विश्वस्मिन् जगति 13,90,934 मानवाः, भारतवर्षे च 1,33,570 संख्यकाः प्रजाजनाः, राजस्थाना प्रदेशे 2,163 संख्यकाः प्रजाजनाः, जयपुरनगर्याञ्च 412 निरीहा जना कोरोनाव्याधिना संग्रस्ताः सन्तो मृत्युंगताः। संक्रमितक्षेत्रेषु 'LOCK DOWN' इत्यस्य पुनरपि सम्भावना प्रतीयत एव।

शुभसङ्केतोऽपि कर्णयोर्गोचरी भवति यद्-माडर्ना, फाइजर, सीरम, स्पुतनिक-V, एस्ट्राजेनका, कोवैक्सीन-प्रभृतयो नैकाष्टीकाद्रव्य (Vaccine) निर्मार्तृसंस्थाः कोरोनाव्याधिप्रतिरोधक- 'टीकाद्रव्य' निर्माणे गभीरतया सततं प्रयासरतास्सन्ति। सम्भाव्यते नव-वर्षारम्भे मध्ये वा प्रयासस्यास्य प्रजाजनेषु क्रियान्वितिः स्यात्।

भारतवर्षे 'कोरोना-टीका' इत्यस्य क्रियान्वि-तिकरणार्थं सर्वकारः 'कोविन एप' इत्यस्यावलम्बनं कर्तुं शक्नोति। टीकाकरणसूच्यां सम्मिलितजनान् तदीय 'आधार-कार्ड' इत्यनेन साकं संयोजयिष्यति, येन 'Vaccine' इत्यस्य पुनरावृत्तिर्न भवेत्। जुलाई, 2020 मासं यावत् 25-30 कोटिसंख्यकजनेषु 'Covid-Vaccine' इत्यस्योपयोगः सम्भाव्यते।

ततः प्रागस्माभिः मुखनासिकाच्छादकस्य 'मास्क' इत्यस्य सम्यक्-प्रयोगः कर्तव्यः, परस्परं सम्यग् अन्तरालम्, सम्मर्दतो दूरेऽवस्थानम् अवश्यं विधेयम्। चिकित्सकीयपरामर्शोऽनुपालनीयः। सर्वकारो यावच्छ-क्यान् सुरक्षोपायान् समाचरितुमीहते, अतस्तन्निर्देशान् पालयितुमपि अस्माकीना प्रवत्तिर्भवेदित्यभ्यर्थयते-

**व्याकरणपीठाध्यक्षचरः, जगद्गुरु-रामानन्दाचार्य-**
**राजस्थान-संस्कृत-विश्वविद्यालयः, जयपुरम्**
**दूरभाषाङ्कः 8386943655**

# शून्यशोकैकादशी

❑ प्रोफेसर ताराशंकरशर्मा पाण्डेयः

**पुण्यं विना नीरसम्**

शून्यं सर्वसुखं कलत्ररहितं पुत्रं विना चात्मजं
पत्नी तत्सुविचारिणी सहचरी सौभाग्यदात्री तथा।
आज्ञाकारिसुतश्च सद्मनि भवेद् विष्णोः कृपा नित्यशो
नो चेत् स्यात्तव जीव! जीवनधनं पुण्यं विना नीरसम्।।1।।

**शून्यं मे वनजीवनम्**

शून्यं मे वनजीवनं न सुषमं लुप्तं समं जीवनं
ताराशाद्वलवंशवंशवलयं दग्धं विधूमं द्रुतम्।
कान्तारोद्भवसौरभापुलकिता लक्ष्मीर्गता साम्प्रतं
काण्डाकाण्डकृताधिकारगहनो लोको न सन्तिष्ठते।।2।।

**पुत्रं विलोक्याद्भुतम्**

शून्यं पुत्रविहीनदीनजननं व्यालोक्यते संसृतौ
जायात्मोद्भवरूपराशिरुचिरं पुत्रं विलोक्याद्भुतम्।
प्रीतोऽहं शिवमानदानशरणो जीवन् कथं व्याकुलो
वंशाधारधराधिपं सुतनयं पश्यामि नो साम्प्रतम्।।3।।

**रे ! चोक्षचन्द्रेति ते**

शून्यं ते भवितायि भाग्यलिखितं दृष्टं न पूर्वं क्वचित्
पौत्रस्नेहिपितामहैः सुजनने रे! चोक्षचन्द्रेति ते।
प्राज्ञैर्गालवतीर्थजोशिप्रथितैः त्वन्नाम निर्धारितं
लीनस्त्वं सुत! मां विहाय पितरं जीवेत्कथं शंकरः।।4।।

**नो श्रूयते रे ! वचः**

शून्यं दुःखसमुद्ररत्नलुलितं नेत्राम्बुबिन्दुर्भवेद्
दीनानाथकृपानिधेर्मधुवचः सत्याधृतं मित्र! ते।
आत्मालापप्रलापलोपपलितः पीयूषपुष्टात्मजः
ग्लानम्लानमनोमयूरमिलितं नो श्रूयते रे! वचः।।5।।

**शून्यं सौरभ पुत्र !**

शून्यं सौरभपुत्रप्रेमरहितं सांसारिकं जीवनं
यात्रादीपशिखापि मे विचलिता तामिस्रपूर्णं जगत्।
दैवाद्दारुणदुःखदावदुरिता-ऽऽदग्धं मनो दूयते
पीडावीवधिकः सुभग्नसुमना जीवेत् कथं शंकरः।।6।।

**प्राप्तास्मि पिण्डं कथम्**

शून्यं सौरभ! कालगालगमनं सेहे कथं केवलो
हा हा पुत्र! परा गतिस्त्वमसि हे! प्राणैर्विमुक्तस्य मे।
पिण्डादानप्रतीक्षमाणपितरः तृप्यन्ति नो साम्प्रतं
तद्गोदानतिलाञ्जलिप्रणिहितं प्राप्तास्मि पिण्डं कथम्।।7।।

**तारां विना शंकरः**

शून्यीभूतभवाब्धिपोतसरणं नो केनिपातोस्ति भोः।
दीनः पोतपतिः समाधिनिरतो नोधानिधीनां पतिः।
यादोवृन्दगतिर्निरुद्धप्रमतिः शुष्को नदीनां पतिः
चक्षुः प्रस्तरतामितं विचलितं तारां विना शंकरः।।8।।

**लोके कथं चोत्सहे**

शून्यं धैर्यधनं तपोवनमिदं तापेन तप्तं त्वचं
दग्धं दारुणदेहगेहगहनं नो मोदमानं मनः।
जाता मे बहुतन्त्रमन्त्रमिषिता मालिन्यमूर्णा मतिः
हा मूर्धाङ्गसमुन्नतिं प्रथयितुं लोके कथं चोत्सहे।।9।।

**यातोऽद्य भोः पंगुताम्**

शून्यव्यूहवनप्रसारितकरः कोयं कविः कोविदः
सारासारविचारहाररसिको धत्तेऽपरं कौशलम्।
धीरो मौहनिरेकलात्मजगतिः तारायुतः शंकरः
काव्याधारशिलाधिरोहप्रवणो यातोऽद्य भोः पंगुताम्।।10।।

**तारावंशप्रथाकथा**

शून्या दिक्करिणो दिशोऽपि मलिनाः शीतांशुसूर्यौ गतौ
तारावंशप्रथाकथा नहि तथा सन्तिष्ठते मौहनी।
दैवाधीनमदीयजीवितमहो पञ्चत्वमार्गस्थितं
शम्भो! त्वं शरणागतिप्रमुखतां प्राप्तश्शिवो ध्यायसे।।11।।

**पूर्व आचार्य एवं विभागाध्यक्षः-साहित्ये**
**ज.रा.राजस्थानसंस्कृतविश्वविद्यालयः, जयपुरम्**

# व्याकरणदर्शनस्य शब्दब्रह्म

❑ विजयकुमारः

शब्दशास्त्रे शाब्दिकानां मते शब्दः एव ब्रह्मरूपेण ऊरीकृतो वर्तते। अखिलोऽपि संसारः शब्दब्रह्मणः विवर्तरूपेण अवस्थितोऽस्ति। ''शब्दः एव ब्रह्म'' इति श्रुत्वा जनमानसे प्रश्नाः भवन्ति यत्- कीदृग् इदं ब्रह्म? किञ्च स्वरूपम्? शब्दब्रह्म जडरूपम् आहोस्वित् चेतनरूपम्? इतिप्रकारकजिज्ञायामुच्यते भर्तृहरिलिखिते वाक्य-पदीये-

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।**
**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः[1]।।**

शब्दः ब्रह्मेति व्याकरणवचनं परिपोषयन्त्यः विभिन्नाः श्रुतयः सन्ति। तद्यथा- ''शब्दे ब्रह्मणि निष्णातः'' इति भागवते, ''अक्षरं न क्षरं विद्यात्'' इति व्याकरणमहाभाष्ये, ''ओमित्येकाक्षरं ब्रह्म'' इति श्रीमद्भगवद्गीतायाम् उक्तम्।

आत्मकल्याणाय जगति द्वौ मार्गौ प्रेयः श्रेयश्च। प्रेयः पन्था विषयादिसम्भोगाय संसारे प्रवृत्तिकरः, श्रेयः पन्थाः तु मोक्षसाधकः स्वीकृतः। मोक्षपदार्थश्च बहुविधैः शास्त्रवचनैः विभिन्नैः शास्त्रवासनावद्भिः बहुधा प्रतिपादितो वर्तते, किन्त्वत्र मोक्षपदार्थः आत्मानुभूति-र्ब्रह्मज्ञानं ब्रह्मसाक्षात्कारो वा ब्राह्मी स्थितिरेव इति विचार्यते। यथोक्तं श्रुतावपि-

**श्रेयश्च प्रेयश्च मनुष्यमेत**
**स्तौ सम्परीत्य विविनक्ति धीरः।**
**श्रेयो हि धीरोऽभिप्रेयसो वृणीते**
**प्रेयो मन्दो योगक्षेमाद् वृणीते[2]।।**

तादृशो हि मोक्षः प्राप्यः, साध्यश्च सुविचारपरैः शब्दब्रह्मोपासनया अनायासेन सुलभ एव। यतोऽक्षरविद्या हि परा विद्या अभिहिता वर्तते। **मुण्डकोपनिषदि** यथा-:

''तस्मै स हो वाच द्वे विद्ये वेदितव्ये इति ह स्म यद् ब्रह्मविदो वदन्ति, परा चैवापरा चेति'' तत्रापरा विद्यैव शास्त्रविद्यापरपर्याया शब्दविद्या हि प्रमुखरूपेण वर्णिता। शास्त्रविद्या जागतिकविद्यापदवीमागता। अत्रापराधिपदेन ऋग्वेदोऽथर्ववेदः, शिक्षा, कल्पः, व्याकरणम्, निरुक्तम्, छन्दः, ज्योतिषमिति गृह्यते। परावस्थया अक्षरमेवा-वधार्यते, पराशब्देनाक्षरमेव ग्रहीतव्यं भवति। अक्षरविषये ''उपनिषदि यथावचनमिदम्, तथाक्षरात् सम्भवतीह विश्वम्'' इति, तेन अक्षरादेव जगतः सृष्टिरभिहिता। **कठोपनिषदि** च तद्विषये प्रोक्तं विद्यते। यथा-

**एतदेवाक्षरं ब्रह्म एतदेवाक्षरं परम्।**
**एतदेवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत्[4]।।**

एवम् अत्र अक्षरपदेन शब्दब्रह्म एव विषयीकृतः, यतो माण्डूक्योपनिषदि शब्दस्य ब्रह्मत्वं प्रतिपादितम् अस्ति।

''ओमित्येकाक्षरमिदं सर्वं तस्योपासनाख्यानभूतं भवत् अति सर्वमोङ्कार[5]'' अकारोकारमकारात्मकमिदम् अक्षरं कालत्रयातीतम्। तुरीयावस्थास्वीकारेण अक्षरमिदं ब्रह्मतत्त्वबोधकमेव। अत्र प्रमाणञ्च तैत्तरीयारण्यके वचनमिदं यत्-

**''गौरी मिमायस्र सलिलानि तक्षती**
**ऐकपदी द्विपदी सा चतुष्पदी।**
**अष्टापदी नवपदी बभूवुषी**
**सह सक्षरा परमे व्योमन्निति[6]।।''**

अस्य वचनस्य अयमाशयस्तात्पर्यरूपो विमृश्यते यत्सृष्टेः प्राक्समये गौरवर्णा वाग्देवी परमाकाशे प्रतिष्ठिता सती जलतरङ्गन्यायेन वर्णान्, पदानि, वाक्यानि च विरचय्य शब्दं व्यसृजत्, अभिव्यक्तीचकार वा। तत्रैकपदी-द्विपदीप्रभृति प्रणवस्य वेदवेदाङ्गादीनां च प्रादुर्भाव-परतया। तत्रायं क्रमो यथा- एकपदी वाक्प्रणवात्मिका भूत्वा पुरुषस्य हृद्देशे अभिभूता प्रकाशमलभत, तदनन्तरमेव व्याहृतयः सावित्रीरूपेण ''द्विपदी'' बभूवुः। ततः परं वेदाश्चत्वारश्चतुष्पदी-रूपेणाविर्भूताः। ततः षड् वेदाङ्गानि धर्मशास्त्राणि, पुराणानि चाष्टपदीविद्यारूपेण आविर्भूतानि। ततः परं मीमांसान्यायसांख्ययोगपाञ्चरात्र-पाशुपतागमायुर्वे-

दगन्धर्ववेदादिर्नवपदीरूपेण अभिव्यज्यमानो बभूव, इत्थम् अभिव्यक्ता सती वाग्देवी अनन्तानन्तवाग्देव्या प्रारम्भे ओङ्कारस्वरूपत्वं सहस्राक्षरात्मत्त्वं च युक्तियुक्तं प्रकाशितम्। स च ओङ्कारः स्वयमेव अव्यक्तोऽनादिश्च तथा परमात्मस्वरूपत्वात् ब्रह्मपरमात्मादिशब्दैर्वर्णितो भवति शास्त्रेषु।

वस्तुतो ब्रह्मणो वास्तविकबोधोऽपि शब्देनैव (ओङ्कारेण) जायते। यदा खलु श्रोत्रेन्द्रियादेर्बाह्यशक्ति-र्विलुप्ता कुण्ठिता वा भवति। तदा शब्दस्य सर्वार्थ-प्रकाशकाकारस्फोटतत्त्वस्य श्रवणे साधवः शाब्दिकाः समर्थाः भवन्ति। ते एव शाब्दिकाः सुषुप्तौ समाधौ च समस्तान् भावान् ज्ञातुं प्रभवन्तीति तथ्यम्। ओङ्काररूपशब्दः परमात्मनो विशुद्धस्वरूपः, स च स्वयं हिरण्यगर्भस्य परमेष्ठिनो हृदयाकाशे वेदवाण्याभिव्यक्तः शब्दः एव वस्तुतः स्वाक्षयरूपपरमात्मनः परब्रह्मणो वा साक्षाद्वाचक इति शास्त्रहृद्यं वस्तु, तथा च स एव शब्दः समस्तवेदमन्त्राणामुपनिषदाञ्च सनातनं बीजमिति सर्वथा प्राशस्त्येन आमनन्ति शास्त्रपारदृश्वानः। तस्मिन् शब्दे (ओङ्कारे) अकारमकारोकारेति वर्णत्रयं सत्त्वर-जस्तमांसि। ऋग्यजुस्सामवेदत्रयं भूर्भुवः लोकत्रयं जाग्रतस्वप्नसुषुप्तिरूपावस्थात्र ज्ञाता-ज्ञेय-ज्ञानात्मक-त्रिपुटिरूपञ्चाभिव्यक्तं मन्यते एव, नात्र कश्चनापि विवादः। ओङ्कारात्मके शब्दब्रह्मण्यभिनिवेशो विशेषतो वैयाकरणानां सिद्धान्तः, एतस्मिन् विषये न केवलं शाब्दिकानां युक्तिप्रमाण एवालम् अपितु तद्विषये शारदातिलकग्रन्थेऽपि शब्दब्रह्मनाम्ना विचारः सम्यक् अभिहितः। यथा-

**''चैतन्यं सर्वभूतानां शब्दब्रह्मेति मे मतम्।**
**तत्प्राप्य कुण्डलीरूपं प्राणिनां देहमध्यगम्।।**
**वर्णात्मनाविर्भवति गद्यपद्यादिभेदतः[7]।''**

अत एव समाहितात्मनः परमेष्ठिनो ब्रह्मणो हृदयाकाशाद् न आविर्भवतीति प्रोक्तमेव। यदा मुमुक्षुर्जीवो स्वमनोवृत्तिम् अवरुणद्धि तदैव तन्नादम् अनुभवति। ततश्च श्रेष्ठयोगिनस्तस्य अनाहतनादस्य सम्यगुपासनां विदधति, तदानीं तन्नादप्रभावेणैवाधिभूतम् (द्रव्यम्), अधिदैवम् (क्रियां), अध्यात्मम् (कारकम्) त्रिविधं मलं विधूय पवित्रान्तःकरणाः परमगतिमोक्षपदं भजन्ते।

अत्रत्यसिद्धान्ते हि सर्वभूतानाञ्चैतन्यं शान्तब्रह्म प्राणिनां देहेषु निवसति। प्राणिनां देहममध्यशरीरान्तः-करणस्थं कुण्डलीरूपं सूक्ष्मं मण्डलीकाराव्यक्तं चैतन्यं शब्दब्रह्मेति पदेन प्रतिपादितमस्ति। अत्राद्वैतपरतया द्वैतविशिष्टाद्वैतपरतया च तत्तच्छास्त्रवासनाव-दभिर्व्याख्यायते। अद्वैतपरकतया हि जीवनस्य चैतन्यमेव परमेश्वरस्य चैतन्यमेकमद्वितीयमस्ति, परन्तूपाधि-भेदादेव भेदावगमः। तत्र जीवचैतन्याद् वर्णात्मक-ध्वनिनाः ईश्वरचैतन्याच्च स्फोटात्मकध्वनिना अभिव्यक्तो भवति। उभयोः ध्वनिगतभेदात् स्फोटोऽपि द्वैतत्वा पन्नः। वेदान्तसारे ईश्वरप्राज्ञयोः स्वात्मानुभवप्रकारेण अनयोः समष्टिव्यष्ट्योर्वनवृक्षयोरिव जलजलाशययोरिव वा भेदः। एतदुपहितयोः ईश्वरप्राज्ञयोरपि वनवृक्षावच्छिन्नाका-शयोरिव वा भेदः।

वस्तुतः शब्दः बिन्दुनादयोः कारणमस्ति। शब्दः ध्वनिरूपेण प्राणिमात्रस्य हृदि तिष्ठत्येव। एतद्विषये ऋग्वेदेऽपि प्रोक्तमस्ति। यथा-

**देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति।**
**सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुप सुष्टुतैत्।।**

**सन्दर्भाः-**


1. वाक्यपदीयम्, ब्रह्मकाण्डम् का. 1
2. कठोपनिषद् - 2/2
3. मुण्डकोपनिषद् - 1/7
4. कठोपनिषद् - 2/16
5. मुण्डकोपनिषद् - 2/15
6. तै. आ. - 1/9/4
7. शारदातिलकम् - 1/2
8. ऋग्वेदः - 8/100/1



**शोधच्छात्रः**

**राष्ट्रिय-संस्कृत-संस्थानम्-जयपुरपरिसरः, जयपरम्**

# अध्यापकेभ्योः वंशानुक्रमवातावरणयोर्महत्त्वम्

❑ बोलतीराम मीना

## प्रस्तावना

मनोविज्ञानक्षेत्रे वंशानुक्रमस्य वातावरणस्य च सम्बन्धिनः अत्यधिकाः विवादाः सन्ति, अनयोः द्वयोः पक्षयोः पृथक्-पृथक् समर्थने प्रारम्भे एव द्वौ वर्गौ अभवताम्। अनयोः मध्ये वंशानुक्रमस्य पक्षपाती समुदायः वंशानुक्रमवादी, वातावरणाय प्रधानता-प्रदातृ-वर्गश्च वातावरणवादी कथ्यते।

वस्तुतः विषयोऽयं गूढः रहस्यमयोऽस्ति। यतः वयं स्वदैनिकजीवने पश्यामः यत् अनेकेषां बालकानां मुखं स्वमातृपितृवद् भवति, तेषां सन्ततिरपि तद्वत् वैदुष्ययुक्ता मूर्खा वा भवति। किन्तु तेन सहैव एतदपि दृश्यते यत् बुद्धिमत्पित्रोः सन्ततिः मूर्खा मूर्खपित्रोश्च बालकाः विद्वांसः भवन्ति। अस्यापि अनेकानि प्रमाणानि सन्ति यत् सज्जनपित्रोः दुराचारिणः अपराधिनश्च बालका अभवन्। अत्र प्रश्नः उत्पद्यते यत् एतत्सर्वं किमर्थं तथा केन प्रकारेण भवति? यदि अस्य कृते पूर्णतः वंशानुक्रम एव उत्तरदायी मन्येत तथापि समस्यायाः समाधानं न प्राप्यते। यतः वंशानुक्रमानुसारं मानवः यादृशः तादृशः एव भविष्यति। ईदृशानि अनेकानि उदाहरणानि प्राप्यन्ते। यत्र बालकाः मातृपितृवन्न भवन्ति। तदा विचारणीयं यत् अन्या शक्तिः काऽऽस्ति या मानवस्य निर्माणे योगदानं ददाति। तां द्वितीयां शक्तिं विद्वांसः वातावरणरूपेण स्वीकुर्वन्ति।

## वंशानुक्रमस्य स्वरूपम्
## ( Nature of Heredity )

साधारणतया वंशानुक्रमस्य तात्पर्यमस्ति यत् यादृशौ पितरौ भवतः तयोः सन्ततिरपि तादृशी एव भवति। अन्यशब्देषु कथ्यते यत् यादृशाः जीवाः भवन्ति ते आत्मतुल्यानेव जीवान् आनयन्ति। अस्य कथनस्याधारे एव वयं पश्यामः यत् बालकः सामान्यतः शारीरिकरूपगुणेषु स्वस्य मातुः पितुश्च अनुरूपमेव भवति। मनौवैज्ञानिकानां तु मतमस्ति यत् बालकः स्वपित्रोः न केवलं शारीरिकगुणान् अपितु मानसिक-सामाजिकगुणानपि प्राप्नोति। अस्य मतानुसारं स्वस्थविद्वत्पित्रोः स्वस्था विदुषी च सन्ततिः भवति, यद्यपि अस्य तथ्यस्य अपवादा अपि प्राप्यन्ते। पूर्वजानां गुणानां हस्तान्तरणं पित्रोः माध्यमेनैव भवति। ईदृशानां गुणानां हस्तान्तरणमेव वंशानुक्रमः आनुवंशिकता वा कथ्यते।

## वंशानुक्रमस्य परिभाषाः
## ( Definitions of Heredity )

कतिपयविदुषां परिभाषा अत्र प्रस्तूयन्ते

1. जैम्स ड्रेवरमहोदयानुसारम्- ''पित्रोः शारीरिक-मानसिकविशेषतानां सन्ततिषु संक्रमणमेव वंशानुक्रम अस्ति।''

2. एच.ए. पेटरसन् महोदयानुसारम्- ''वंशानुक्रमः अनेन प्रकारेण परिभाषितुं शक्यते यत् व्यक्तिः स्वपित्रोः माध्यमेन पूर्वजानां यान् गुणान् प्राप्नोति, ते गुणाः एव वंशानुक्रमः कथ्यन्ते।''

3. वुडवर्थ महोदयानुसारम् - ''वंशानुक्रमे तानि सर्वाणि वस्तूनि आयान्ति यानि जीवनस्य आरम्भे व्यक्तौ उपस्थितानि आसन्। ते सर्वे गुणाः जन्मतः न, परं गर्भाधानस्य समये जन्मतः प्रायशः नवमासपूर्वमेव उत्पद्यन्ते।''

---

शिक्षामनोविज्ञान-पृ.सं. 42
-पी.ड़ी. पाठक

### वातावरण-स्वरूपम्
### ( Nature of Environment )

बालकस्य व्यक्तित्वस्य विकासे वातावरणस्य महत्त्वपूर्णयोगदानस्य उपेक्षा कर्तुं न शक्यते। वंशानुक्रमस्य अध्ययनेन एकं तथ्यं स्पष्टं भवति यत् बालकः वंशानुक्रमेण अनेकशक्तीः क्षमताश्च गृहीत्वा जन्म गृह्णाति, किन्तु आसां शक्तीनां विकासः वातावरणोपरि निर्भरो भवति। यदि बालकः श्रेष्ठवातावरणं प्राप्नोति तर्हि सः स्वशक्तीनां विकासं कृत्वा प्रतिष्ठितजीवनं व्यतीतं कर्तुं शक्नोति। वातावरणमेव **पर्यावरणं** कथ्यते। पर्यावरण-शब्दस्य रचना द्वयोः शब्दयोः मेलनेन अभवत्- परि+आवरणम्। परि-शब्दस्यार्थः अस्ति ''परितः'' तथा 'आवरणम्' इत्यस्यार्थोऽस्ति-आवरणकर्ता। अनेन प्रकारेण पर्यावरणेन तात्पर्यं तैः सर्वैः वस्तुभिः अस्ति यानि व्यक्तिं परितः आवृण्वन्ति। अन्यशब्देषु कथयितुं शक्यते यत् वातावरणे तानि सर्वाणि तत्त्वानि सम्मिलितानि भवन्ति यानि मानवजीवनं प्रत्यक्षरूपेण प्रभावितं कुर्वन्ति।

### वातावरण-परिभाषाः
### ( Definition of environment )

कतिपये विद्वांसः अत्र परिभाषितवन्तः -

1. वुडवर्थ-महोदयानुसारम्-वातावरणे तानि सर्वाणि बाह्यतत्त्वानि सम्मिलितानि भवन्ति, यानि व्यक्तिं जीवनस्य प्रारम्भ एव प्रभावयन्ति।

2. जे. एस. रास महोदयानुसारम्-वातावरणमेका बाह्या शक्तिरस्ति या अस्मान् प्रभावयति।

### बालकस्योपरि वातावरणस्य प्रभावाः
### ( Influences of Environment on Child )

तथ्यमिदं निर्विवादं सत्यमस्ति यत् वातावरणं बालकस्य विकासं प्रभावयति। अस्मिन् क्षेत्रे मनोवैज्ञानिकाः अनेकप्रयोगान् कृत्वा अस्य तथ्यस्य पुष्टिमकुर्वन्। अत्र वयं पश्यामः यत् व्यक्तित्वस्य केषुचित् पक्षेषु वातावरणस्य प्रभावः आगच्छति।

निम्नबिन्दवः -

1. शारीरिकविभिन्नता।
2. व्यक्तित्त्वस्योपरि प्रभावः।
3. मानसिकविकासस्योपरि प्रभावः।
4. बुद्धेः उपरि प्रभावः।
5. व्यावसायिकदक्षतायां प्रभावः।

### वंशानुक्रमस्य वातावरणस्य च सापेक्षमहत्त्वम्
### ( Relative Importance of Heredity & environment )

वंशानुक्रमस्य वातावरणस्य च सापेक्षमहत्त्वस्य विषये विद्वत्सु मतभेदाः विद्यन्ते। केषाञ्चित् विदुषां मतमस्ति यत् कतिपये गुणाः वंशानुगताः भवन्ति, येषामुपरि वातावरणस्य प्रभावः न आगच्छति। एतादृशाः विद्वांसः वंशानुक्रमं वातावरणस्य अपेक्षया श्रेष्ठं मन्यन्ते। तद्विपरीतं गाल्टन, वाटसन इत्यादीनां मनोवैज्ञानिकानां मतानुसारं वातावरणम् अत्यधिकं महत्त्वपूर्णमस्ति। तेषां विश्वासोऽस्ति यत् मानवस्य योग्यतानां, क्षमतानां शारीरिकविशेषतानां च निर्धारणे वंशानुक्रमस्य किमपि योगदानं न भवति।

अधुना अधिकांशशिक्षाशास्त्रिणः अनुभवन्ति यत् 'वंशानुक्रमः' तथा 'वातावरणम्' उभे एव महत्यौ शक्ती विद्येते। उभे एव शिक्षकस्य विकासं प्रभावयतः। उभे एव वाहनस्य चक्रवत् भवतः। मैकाइवरः पेजश्च वंशानुक्रमस्य वातावरणस्य च सापेक्षं महत्त्वं स्वीकुर्वन्तौ स्वविचारान्

---

शिक्षामनोविज्ञान- पी.ड़ी. पाठक (पृ. सं. 48)

शिक्षामनोविज्ञानम्-प्रो. फतेहसिंहः

- Woodworth (P. 153)

शिक्षामनोविज्ञान- पी.ड़ी. पाठक

अनेन प्रकारेण प्रकटितवन्तौ- "जीवनस्य प्रत्येकं घटना वंशानुक्रमवातावरणयोः द्वयोरेव परिणामः भवति। परिणामाय द्वयोरपि समानरूपेण आवश्यकता भवति।" अस्मिन् एकमपि न तु व्यवकलयितुं शक्यते, न च पृथक्कर्तुं शक्यते।

मैकाइवरस्य कथनेन स्पष्टमस्ति यत् वंशानुक्रमः वातावरणञ्च परस्परं विरोधिनौ भूत्वा पूरकौ भवतः। वंशानुक्रमः बालकमनेकविधशक्तिभिः विभूषयति, वातावरणञ्च तासां शक्तीनां विकासे सहयोगं प्रददाति। अस्मिन् सम्बन्धे लैंडिसमहोदयस्य कथनमासीत् यत् "वंशानुक्रमः अस्मभ्यम् अस्माकं कार्यशीलमूलधनं प्रददाति तथा वातावरणम् अस्मभ्यम् अस्य मूलधनस्य विनियोगस्य अवसरं प्रददाति।"

अनेन स्फुटीभवति यत् वातावरणं वंशानुक्रमश्च परस्परं निर्भरौ भवतः। वंशानुक्रमः एकविधं बीजारोपणं करोति तथा वातावरणं तस्य अंकुरणानन्तरं वृद्धौ सहायतां प्रददाति। यदि वंशानुक्रमेण कश्चन बालकः बौद्धिक-शक्तिं न प्राप्नोति तर्हि वातावरणमपि तस्मिन् बुद्धेः विकासं कर्तुं न शक्नोति। तथैव यदि उच्चबुद्धियुक्त-बालकः निम्नस्तरयुक्ते वातावरणे स्थाप्येत तर्ह्यपि तस्य बौद्धिकविकासः सम्भवः नास्ति। अनेन स्पष्टमस्ति यत् उभौ अपि परस्परं निर्भरौ विद्येते। अस्मिन् सम्बन्धे मोर्स-विंगोमहोदययोः विचारोऽस्ति यत् 'मानवव्यवहारस्य प्रत्येकं विशेषता वंशानुक्रमस्य वातावरणस्य च अन्तः-क्रियायाः परिणामो भवति।' अत एव एकस्य प्रभावः अन्यस्य अपेक्षया अधिकः न्यूनो वा अस्ति इति कथनं व्यर्थं विद्यते। लुम्लेमहोदयः सम्यगलिखत् यत्- "एतद् वंशानुक्रमः वातावरणं वा नास्ति किन्तु वंशानुक्रमः वातावरणञ्चास्ति।"

शिक्षामनोविज्ञानम्- प्रो. फतेहसिंहः (पृ. सं. 49)

उपर्युक्तविवेचनेन स्पष्टं भवति यत् बालकस्य विकासाय वातावरणस्य वंशानुक्रमस्य च समानं महत्त्व-मस्ति।

### अध्यापकेभ्यः वंशानुक्रमवातावरणयोः महत्त्वम्

### ( Importance of Heredity & Environment for Teacher )

वंशानुक्रमः वातावरणञ्च शिक्षामनोविज्ञानस्य द्वौ महत्त्वपूर्णघटकौ भवतः। अध्यापकाय अनयोः उचित-ज्ञानमावश्यकमस्ति। शिक्षणं प्रभावि तथा सरलं कर्तुं द्वयोः तत्त्वयोः ज्ञानम् अध्यापकस्य साहाय्यं करोति।

1. वंशानुक्रमस्य कारणेन बालकेषु अनेकविभिन्नताः प्राप्यन्ते। एतासां विभिन्नतानां ज्ञानं शिक्षकाय कक्षाध्यापनेन सह शिक्षणसामग्रीणां घटने सहायकं भवति। अनेन सह शिक्षकः विद्यालये विविधप्रकारस्य पाठ्यसहगामिक्रियाणाम् आयोजनेऽपि सफलो भवितुं शक्नोति।

2. वंशानुक्रमस्य ज्ञानेन शिक्षकः बालकस्य जन्मजात-योग्यताः ज्ञातुं शक्नोति तथा तदनुसारं तस्य व्यवहारं निर्मातुं शक्नोति।

3. वातावरणमेव बालकेषु श्रेष्ठस्वभावानां विकासं कृत्वा तेषु नैतिकं चारित्रिकबलञ्च वर्धयति। अत एव शिक्षकेण विद्यालये अनुकूलवातावरणं उत्पादनीयम्।

4. वंशानुक्रमवत् वातावरणस्य ज्ञानमपि शिक्षकाय उपयोगि भवति। शिक्षायाः अनेकसाधनेषु परिवारोऽपि बालकस्य शिक्षायाः एकं महत्त्वपूर्णं साधनमस्ति। परिवारस्य वातावरणं यादृशं भविष्यति, बालकस्योपरि तादृश एव प्रभावः आगमिष्यति। परिवारस्य वातावरणस्य कारणेन अनेकबालकाः समस्यात्मक-बालकाः भवन्ति।

शिक्षामनोविज्ञानम्- प्रो. फतेहसिंहः (पृ. सं. 50)

अत एव शिक्षकेण बालकस्य परिवारस्य वातावरणज्ञानं प्राप्य बालकः रक्षणीयः।

5. लिंगीयभेदः वंशानुगतो भवति, येन बालकबालिकानां क्षमतासु योग्यतासु च भेदः स्वाभाविकः। एतद् ज्ञानम् अध्यापकाय उपयुक्तविषयाणां व्यवस्थाकरणे सहायकं भवति।

6. बालकैः प्राप्ताः वाञ्छनीयाः अवाञ्छनीयाश्च प्रवृत्तयः वंशानुगताः भवन्ति। आसां प्रवृत्तीनां ज्ञानेन शिक्षकः एतद् निश्चेतुं शक्नोति यत् काः प्रवृत्तयः केन प्रकारेण विकासनीयाः, कासां प्रवृत्तीनां शोधनञ्च करणीयम्।

7. बुद्धिः, रुचिः, अभिवृत्तिः योग्यता च जन्मजाताः भवन्ति। एतासां ज्ञानेन अध्यापकः बालकान् उचितं शैक्षिकं व्यावसायिकञ्च निर्देशनं दातुं शक्नोति।

8. वंशानुक्रमः बालकस्य शिक्षणस्य गतिमपि प्रभावयति। अस्य परिणामस्वरूपेण कतिपये बालकाः शीघ्रतया अवगच्छन्ति कतिपये च विलम्बेन। अनेन तथ्येन अवगतः अध्यापकः स्वकार्यप्रणालीं निश्चिनोति।

9. वंशानुक्रमस्य समानतायाः, भिन्नतायाः, प्रत्यागमनस्य च नियमानां ज्ञानम् अध्यापकाय बालकानां गुणदोषाणामवगमने सहायकं भवति। अनेकवारम् अध्यापकाः "समानः, समानं जन्म" इत्यस्य सिद्धान्ते विश्वासं कृत्वा प्रतिभाशालिपित्रोः सामान्यबुद्धियुक्त-बालकैः उच्चाऽपेक्षं करोति। सः ईदृशान् बालकान् तेषां स्वपित्रोः उदाहरणं दत्त्वा कक्षायामपमानितं करोति। अनेन बालके भावनाग्रन्थीनां विकासे भयं भवति। अध्यापकाय एतेषां नियमानां ज्ञानमेव बालकान् भावनाग्रन्थिभिः रक्षितुं शक्नोति।

आधुनिकं शिक्षामनोविज्ञानम्-डॉ. लोकमान्यमिश्रः
शिक्षामनोविज्ञानम्-प्रो. फतेह सिंहः

10. लोकतन्त्रस्य सफलतायै आवश्यकमस्ति यत् अत्रत्येषु नागरिकेषु स्वकर्तव्यानाम्, अधिकाराणां च ज्ञानं भवेत्, राष्ट्रियतायाः भावनया ते ओतप्रोताः भवेयुः, स्वविचाराणाम् उचितामभिव्यक्तिं कर्तुं शक्नुयुः तथा तेषां नैतिक-मनोबलम् उन्नतं भवेत्। एषां समस्तगुणानां विकासाय अध्यापकः विद्यालये तदनुकूलं वातावरणम् उत्पादयितुं शक्नोति।

11. बालकेषु कुसमायोजनस्य समस्या वातावरणस्य कारणेनैव उत्पादिताः भवन्ति। अत एव अध्यापकाय आवश्यकमस्ति यत् स बालकैः, सम्बन्धितवातावरणस्य अध्ययनं कृत्वा कुसमायोजनस्य कारणानां निदानं कुर्यात् तथा तेषामुपचाराय उपयुक्तवातावरणं रचयेत्।

**उपसंहारः** - उपर्युक्तविवेचनेन स्पष्टमस्ति यत् शिक्षकाय वातावरणस्य वंशानुक्रमस्य च उभयोः ज्ञानमधिकं महत्त्वपूर्णमस्ति। एतयोः ज्ञानेनैव सः बालकस्य सर्वाङ्गीणविकासे योगदानं कर्तुं शक्नोति। सोरेन्सनमहोदयस्य कथनमस्ति यत् शिक्षकाय मानव-विकासस्योपरि वंशानुक्रमवातावरणयोः सापेक्षिक-प्रभावस्य पारस्परिकसम्बन्धस्य च ज्ञानस्य विशेषमहत्त्वं विद्यते।

**सन्दर्भग्रन्थाः** -

1. शिक्षामनोविज्ञानम्-प्रो. फतेहसिंहः, आदित्य-प्रकाशनम्, जयपुरम्, 2008
2. निर्देशन एवं परामर्शन (सम्प्रत्यय क्षेत्र एवं उपागम) - मधु अस्थाना, अमरनाथ राय, मोतीलाल बनारसीदास, दिल्ली
3. शिक्षा मनोविज्ञान, पी.डी.पाठक, 'अग्रवाल पब्लिकेशन्स'
4. आधुनिकं शिक्षामनोविज्ञानम्- डॉ. लोकमान्यमिश्रः, मृगाक्षी प्रकाशनम्, लखनऊ
5. अन्तर्जालपुटानि (Websites)

**शोधार्थी**
**शिक्षाशास्त्र-विभागः**
**राष्ट्रियसंस्कृतसंस्थानम्, जयपुरपरिसरः, जयपुरम्**

# व्याकरणशास्त्रस्यानुषङ्गिकप्रयोजनानि

❑ डॉ. उषाकिरणयादवः

पूर्वस्मिन् शोधलेखे मया महर्षिपतञ्जले: व्याकरण-महाभाष्ये प्रोक्तेषु व्याकरणस्य त्रयोदशानुषङ्गिकप्रयोज-नेषु सप्तप्रयोजनानां निरूपणङ्कृतम्। लेखेऽस्मिन् वर्ण्यन्ते शेषप्रयोजनानि। वर्णनमिदमप्योलिखित रूपे क्रियते महाभाष्यानुसारम्-

८-**चत्वारि**-महर्षिणोद्धृतो मन्त्रोऽयमस्ति- "**चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्तहस्तासो अस्य। त्रिद्यो बद्धो वृषभो रोरवीति, महो देवो मर्त्यान् आविवेश।।**[1]"

मन्त्रस्य भाष्यं कृत्वाऽन्ते व्याकरणस्य प्रयोजनं कथितमित्थम्- "**महता देवेन नः साम्यं यथा स्यादित्यध्येयं व्याकरणम्।**[2]" अर्थात् यो वृषभस्वरूपः शब्ददेवो मनुष्येषु प्रविष्टः तेन सह साम्यार्थं व्याकरणस्याध्ययनमावश्यकं विद्यते। कथितुं शक्यते यदत्र व्याकरणस्याध्ययनेन मोक्षप्राप्तिः शब्दस्य ब्रह्मरूपता संकेतिताऽत्र।

महाभाष्ये उल्लिखितो मन्त्रोऽयं ऋग्वेदस्यास्ति[3]। मन्त्रस्य महाभाष्ये या व्याख्या कृता तदनुसारं चत्वारि शृङ्गा- इत्यस्यार्थोऽस्ति-नामाख्यातोपसर्गनिपाता-ख्यानि चतुर्विधपदानि। त्रयो अस्य पादा- इत्यस्य तात्पर्यं विद्यते- भूतभविष्यद्वर्तमानस्वरूपास्त्रयः कालाः। द्वे शीर्षे-इत्यंशेन शब्दस्य द्वौ भेदौ कथितौ-नित्यः कार्यश्च। 'सप्त हस्तासो' इति भागः सप्तविभक्तीनां वाचकोऽस्ति।

उरसि कण्ठे शिरसि च त्रिषु स्थानेषु बन्धनमुक्तम्-त्रिधा बद्धो-इत्यनेन वृषभशब्दस्यार्थोऽस्ति-वर्षकः। रोरवीति-इति शब्दः-शब्दं करोतीत्यर्थस्याभिधायको विद्यते। महो देवो मर्त्यां आविवेश-इत्यस्य चरणस्य तात्पर्यमस्ति यन्महान् शब्दस्वरूपदेवः शब्दब्रह्म वा मरणधर्मेषु मानवेषु प्रवेशमकरोत्[4]। **प्रदीपटीकायां** स्पष्टीकृतं यदत्र शब्दस्य वृषभत्वेन निरूपणङ्कृतम्। टीकायां शब्दस्य द्वौ भेदौ व्यङ्ग्यव्यञ्जकौ कथितौ।

वर्षणादित्यस्य व्याख्या कृता 'कामानां ज्ञान-पूर्वकानुष्ठानफलत्वात्।' महतेति 'परेण-ब्रह्मणेत्यर्थः'-इत्यपि कथितं तत्रैव[5]। महाभाष्ये 'चत्वारि' इति प्रयोजनार्थमपरोऽपि मन्त्र उद्धृतोऽयम्-

"**चत्वारि वाक्परिमिता पदानि,**
**तानि विदुर्ब्राह्मणा ये मनीषिणः।**
**गुहा त्रीणि निहिता नेङ्गयन्ति,**
**तुरीयं वाचो मनुष्या वदन्ति**[6]।।"

अयम्मन्त्रोऽपि ऋग्वेदस्यास्ति[7]।

महाभाष्ये मन्त्रस्य या व्याख्या कृता तदनुसारमत्र चत्वारि वाक्परिमिता पदानि-इत्यंशः पूर्ववत् नामाख्या-तोपसर्गनिपाताख्यचतुर्विधपदानामभिधायकोऽस्ति।

मनीषिणः इत्यस्यार्थोऽस्ति-मनस ईषिणः। नेङ्गयन्ति-इति शब्दो-न निमिषन्ति इत्यर्थस्य वाचको विद्यते।

तुरीयं वाचो-इत्यस्य तात्पर्यमस्ति वाचः चतुर्थोऽशः४।

गुहेति-प्रदीपे स्पष्टीकृतमित्थम्- 'कथं मनीषिण एव विदन्तीत्याह-गुहेति। अज्ञानमेव गुहा तस्यामित्यर्थः। व्याकरणप्रदीपेन तु तानि प्रकाशन्ते। तत्र चतुर्णां पदजातानामेकैकस्य चतुर्थभागं मनुष्या अवैयाकरणा वदन्ति।' मन्त्रस्यास्य सारांशोऽयङ्कथितुं शक्यते यदज्ञानरूपायां हृदयरूपायां गुहायां वा या वाक् विद्यते तस्याः प्रतीतिः केवलं वैयाकरणा एव, शास्त्रज्ञान-बलेनाज्ञानतमसो विदारणं कृत्वा तां ज्ञातुं शक्नुवन्ति अतः व्याकरणस्याध्ययनमावश्यकमस्ति।

**9. उत त्वः** - अस्य प्रयोजनस्य संकेतकः सम्पूर्ण-मन्त्रोऽयमस्ति-

**''उत त्वः पश्यन्न ददर्श वाच-**
**मुत त्वः शृण्वन्न शृणोत्येनाम्।**
**उतो त्वस्मै तन्वं विसस्रे**
**जायेव पत्य उशती सुवासाः[10]।''**

मन्त्र एष ऋग्वेदे संकलितो विद्यते[11]।

महाभाष्यानुसारमस्य मन्त्रस्यार्धांशो व्याकरणस्य अज्ञातारं प्रत्युक्तो यदवैयाकरणो वाचं पश्यन्नपि न पश्यति शृण्वन्नपि न शृणोति च। ऋच उत्तरार्धो वाग्विदः दशां प्रकटयति यद् वैयाकरणस्य समक्षमियं वाक् स्वस्य तनुं तथैव प्रकाशयति यथा कामयमाना सुवासा जाया पत्ये आत्मानं प्रकटीकरोति। वागस्मभ्यं स्वस्य समग्रस्वरूपं प्रकाशयेदित्यर्थमध्ययनङ्करणीयं व्याकरणस्य[12]।

पश्यन्नपि न पश्यति वाचम्-इत्यस्य प्रदीपे व्याख्या कृता- 'प्रत्यक्षेण शब्दस्वरूपमुपलभमानोऽप्यर्था-परिज्ञानान्न पश्यतीत्यर्थः[13]।'

**10. सक्तुमिव** - प्रयोजनस्यास्य कथनार्थमुद्धृतो मन्त्रोऽयमस्ति-

**''सक्तुमिव तितउना पुनन्तो**
**यत्र धीरा मनसा वाचमक्रत।**
**अत्रा सखायः सख्यानि जानते**
**भद्रैषां लक्ष्मीर्निहिताधिवाचि[14]।।''**

महाभाष्यानुसारमस्य मन्त्रस्य व्याकरणपरोऽर्थोऽय-मस्ति यद् यथा जनास्तितउना दुःशोधं सक्तुं शुद्धं कुर्वन्ति तथैव धीराः वैयाकरणा अपि शब्दानपशब्देभ्यः पृथक् कृत्वा सखायः सन्तः सख्यानि जानन्ति। एषां वाचि कल्याणकर्त्री लक्ष्मीः सन्निहिता भवति[15]।

सखायः, वाचि- इत्यनयोर्द्वयोः पदयोः व्याख्या कृता प्रदीपकारेणेयम्- 'सखाय समानख्यातयो भेदग्रहस्य निवृत्तत्वात्सर्वमेकमिति मन्यन्ते।'

वाचीति-वेदाख्ये ब्रह्मणि या लक्ष्मीर्वेदान्तेषु परमार्थ संविल्लक्षणोक्ता, सैषां निहितेत्यर्थः[16]।

**11. सारस्वतीम्**- एतत्प्रयोजनपरोंऽशोऽस्ति महा-भाष्येऽयम्- 'याज्ञिकाः पठन्ति' ''आहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्वपेद्'' इति प्रायश्चित्तीया मा भूमेत्यध्येयं व्याकरणम्[17]। प्रयोजनमिदं स्पष्टमेवास्ति। कैयटकृतव्याख्ययानया च सुस्पष्टं भवति- 'प्रायश्चितीया इति प्रायश्चित्ताय पापशोधनाय श्रुति-स्मृतिविहिताय कर्मणे हितास्तन्निमित्तोत्पादना मा भूमे-त्यर्थः[18]।'

**12. दशम्यां पुत्रस्य** - प्रयोजनमिदमपि महर्षिणा याज्ञि-कानाम्मतानुसारमुक्तम्। मतानां व्याकरणपरः सारांशोऽयमस्ति यत्पुत्रस्य नामकरणं कृत् प्रत्ययान्तं भवितव्यं न तद्धितान्तम्। व्याकरणं विना कृत्-तद्धित-प्रत्ययानां ज्ञानं भवितुं न शक्यतेऽतः व्याकरणस्य पठनमावश्यकमस्ति। महाभाष्यस्य समग्रांश इत्थमस्ति- 'याज्ञिकाः पठन्ति- ''दशम्युत्तरकालं पुत्रस्य जातस्य नाम विदध्याद् घोषवदाद्यन्तान्तस्थमवृद्धं त्रिपुरुषानू-कमनरिप्रतिष्ठितम्। तद्धि प्रतिष्ठिततमं भवति।' द्व्यक्षरं चतुरक्षरं वा नाम कृतं कुर्यान्न तद्धितम्''इति

न चान्तरेण व्याकरणं कृतस्तद्धिता वा शक्या विज्ञातुम्। दशम्यां पुत्रस्य[19]। अस्य पाठ्यांशस्य केषाञ्चित्पदानां व्याख्या कृतेत्थं प्रदीपटीकायामुदश दिनान्यशौचं भवतीति दशम्युत्तरकालमित्युक्तम्। येऽपि गृह्यकाराः पठन्ति दशम्यां पुत्रस्येति, तैरपि दशम्यामिति **सामीपिकमधिकरणं** व्याख्येयम्।

त्रिपुरुषानूकमिति। नामकरणे योऽधिकारी पिता तस्य ये त्रयः पुरुषास्ताननुकायत्यभिधत्त इति त्रिपुरुषानूकम्[20]।

**13. सुदेवो असि**- प्रयोजनपरोऽयम्मन्त्रोऽस्ति- 'सुदेवो असि वरुण यस्य ते सप्तसिन्धवः। अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिव[21]।' महाभाष्ये उद्धृत एष मन्त्रोऽपि ऋग्वेदस्य अस्ति[22]। मन्त्रेण व्याकरणस्य प्रयोजनं प्राप्तं महर्षिणेदं- 'सत्यदेवाः स्यामेत्यध्येयं व्याकरणम्[23]' प्रतीयते यन्महर्षिः वरुणदेवेन सह वैयाकरणस्य साम्यमिदं कथितुमिच्छति यत् समुचितशब्दानां ज्ञानेन प्रयोगेण च वैयाकरणोऽपि परिशुद्धो भूत्वा वरुण इव भवितुं शक्नोति।

मन्त्रस्य शब्दानां व्याख्या कृतेत्थं महाभाष्ये- 'सुदेवो असि वरुण **सत्यदेवोऽसि**।' यस्य ते सप्तसिन्धवः सप्तविभक्तयः। अनुक्षरन्ति काकुदम्। काकुदं तालु, काकुर्जिह्वा, साऽस्मिन् उद्यते इति काकुदम्। सूर्म्यं सुषिरामिव। तद्यथा शोभनाम् ऊर्मिं सुषिरामग्निरन्तः प्रविश्य दहति एवं ते सप्तसिन्धवः सप्तविभक्तयः ताल्वनुक्षरन्ति। तेनासि सत्यदेवः। सत्यदेवाः स्यामेत्यध्येयं व्याकरणम्। सुदेवो असि[24]। प्रदीपटीकानुसारं केषांचित् शब्दानामर्थास्सन्ति इमे- 'सुदेवो असीति। वरुणस्येयं स्तुतिः। यतो हेतोर्व्याकरणज्ञानाद्वरुण सत्यदेवोऽसि ततो हेतोरन्येऽपि सत्यदेवा भवन्तीत्यर्थः। सिन्धव इति। नद्य इव विभक्तय इत्यर्थः। अनुक्षरन्तीति। ताल्वनुप्राप्य प्रकाशन्त इत्यर्थः। सास्मिन्नुद्यत इति[25]।'

**निष्कर्षः**- महर्षिपतञ्जलेः व्याकरणमहाभाष्ये प्रतिपादितैः पञ्चभिस्त्रयोदशभिश्च प्रयोजनैः प्राप्यते निष्कर्षोऽयं यदस्माकं लौकिकालौकिकोभयविध-कल्याणार्थं व्याकरणस्याध्ययनं सर्वथाऽवश्यकमस्ति। शास्त्रस्यास्य व्यावहारिकं महत्त्वं नामकरणसंस्कारात् प्रारभ्यते आजीवनं प्रवर्तते च।

**सन्दर्भाः** -

1. श्रीपतञ्जलिमुनिविरचितं व्याकरणमहाभाष्यम्। व्याख्याकारः डॉ. रमाकान्तपाण्डेयः। जगदीश-संस्कृत-पुस्तकालयः जयपुरात् 2007 इत्यस्य प्रथमाध्याये प्रथमपादे-पस्पशाह्निकम् पृष्ठाङ्कः 21
2. तत्रैव, पृष्ठांकः 21
3. ऋग्वेदे, 4/58/3, ऋग्वेदभाष्यम्, महर्षि दयानन्दसरस्वती, प्रकाशकः- विश्व-मानव-उत्थान-परिषद् 2005 ई. नई दिल्ली।
4. व्याकरणमहाभाष्ये, पृष्ठांकः 21
5. तत्रैव, प्रदीपटीका, पृष्ठांकः 21
6. व्याकरणमहाभाष्ये, पृष्ठांकः 23
7. ऋग्वेदे, 1/164/45
8. व्याकरणमहाभाष्ये, पृष्ठांकः 23
9. तत्रैव, प्रदीपटीका, पृष्ठांकः 23
10. व्याकरणमहाभाष्ये, पृष्ठांकः 24
11. ऋग्वेदे, 10/7/14
12. व्याकरणमहाभाष्ये, पृष्ठांकः 24
13. तत्रैव, प्रदीपटीका, पृष्ठांकः 24
14. व्याकरणमहाभाष्ये, पृष्ठांकः 25
15. तत्रैव, पृष्ठांकः 25
16. तत्रैव, प्रदीपटीका, पृष्ठांकः 26
17. व्याकरणमहाभाष्ये, पृष्ठांकः 27
18. तत्रैव, प्रदीपटीका, पृष्ठांकः 27
19. व्याकरणमहाभाष्ये, पृष्ठांकः 27
20. तत्रैव, प्रदीपटीका, पृष्ठांकः 27
21. व्याकरणमहाभाष्ये, पृष्ठांकः 28
22. ऋग्वेदे, 7/69/12
23. व्याकरणमहाभाष्ये, पृष्ठांकः 28
24. तत्रैव, पृष्ठांकः 28
25. तत्रैव, प्रदीपटीका, पृष्ठांकः 28

**सह-आचार्या, संस्कृतविभागे,**
**से.मु.मा. राजकीये स्नातकोत्तरकन्यामहाविद्यालये,**
**भीलवाड़ानगरम् (राजस्थानम्) 311001**
**चलदूरभाषाङ्कः-9414812105**

संस्कृतसमाचाराः

# भारतीय-प्राच्यविद्या वैश्विकीं ख्यातिमुपगता

विश्वगुरुदीप-आश्रम-शोधसंस्थान-जयपुर-द्वारा-सम्प्रति भारतीयप्राच्यविद्यानाम् अष्टानां पाठ्यक्रमाणां संचालनं भारते विश्वस्यानेकेषु देशेषु च विहितम्। भारतवर्षे दिल्ल्यां जयपुर-पाली-सीकर-नागौर-मण्डलेषु विश्वे च विएना (आस्ट्रिया) जर्मनी-फ्रांस-इंग्लैण्ड-कनाडा-अमेरिका-मैक्सिको-पौलैंड-चेक-रिपब्लिक-यूक्रेन-आस्ट्रेलिया-न्यूजीलैंड-स्लोवाक-रिपब्लिक-क्रोशिया-हंगरी-सर्विया इटली-दक्षिणाफ्रिका-प्रभृति देशेषु च एषामध्ययनाय पाठकाः संयुक्ता अभवन्। एषु देशेषु भारतीयप्राच्यविद्याया वेदविज्ञान-लिपि विज्ञान-योग-ज्योतिर्विज्ञान-पौरोहित्य-आयुर्वेद-वैदिकगणितादयो विषया ग्राह्याः सन्ति। एभिः प्रभावितः क्रोशियास्थित-यूनिवर्सिटी ऑफ रियेका-द्वाराऽपि शोधसंस्थानेन सह शोधकार्यानुमतिः याचिता। आसां विद्यानां प्रचारप्रसाराय विश्वविद्यालयः स्वीयं विश्वासं प्राप्तः। आसु विद्यासु निहितानां वैज्ञानिकतत्त्वानामनु-संधानाय अयं विश्वविद्यालयः शोधसंस्थानेन सह कार्यं कर्तुं कृतसंकल्पोऽस्ति। अस्माकं कृते गौरवस्यायं विषयो यद् भारतीयसंस्कृतेः देववाण्याश्च विश्वे ख्यातिर्वर्धमाना-ऽस्ति। संस्कृतानुरागिणां कृतेऽप्ययं वस्तुतः शुभसंकेतः।

**सुदामा शर्मा**
**प्रबन्ध सम्पादकः**
**भारती-संस्कृत-मासपत्रिका**

# महर्षि-वाल्मीकिव्याख्यानामाला सम्पन्न

मोहनलालसुखाडिया-विश्वविद्यालयः उदयपुर-राजस्थान-संस्कृत-अकादमी-जयपुर-विश्वगुरुदीप-आश्रम-शोधसंस्थान-जयपुर-संस्थानां संयुक्त-तत्त्वावधाने समयोजिता सप्तदिवसीया महर्षिवाल्मीकि-व्याख्यानमाला विगतसप्ताहे सम्पन्नतामुपगता। कार्यक्रमे सार्वभौम-जगद्गुरुमहामण्डलेश्वरस्वामिमहेश्वरानन्द-पूज्यपादानां सान्निध्यम् आस्ट्रिया (यूरोप) तः सम्प्राप्तम्। सरंक्षकत्वेन प्रो. अमरिकासिंहः, कुलपतिः, मोहनलाल-सुखाडियाविश्वविद्यालयः, उदयपुरस्था प्रो. सीमा मलिकमहोदया, कार्यक्रमाध्यक्षत्वेन देवर्षिकला-नाथशास्त्रिणः उपातिष्ठन्। उपाध्यक्षाः स्वामिज्ञानेश्वरपुरी महोदयाः आसन्। प्रो. नीरजशर्मा, डॉ. मुरलीधरः, डॉ. सुरेंद्रकुमारशर्मा च संयोजका अवर्तन्त। व्याख्यानमालायां सप्तदिवसावधिं यावत् क्रमशः पण्डित अनन्तशर्मा महोदयः, महन्तः हरिशंकरदासः वेदान्ती, डॉ. रामदेवः साहूः, प्रो. राधावल्लभः त्रिपाठी, प्रो.मिथिलाप्रसादः त्रिपाठी, प्रो. के. ई. धरणीधरनादयः प्रथिताः संस्कृतानु-रागिविद्वान्सः महर्षिवाल्मीकिं तद्रचितं रामायणं चाधिकृत्य व्याख्यानानि प्रस्तुतवन्तः।

**सुदामा शर्मा**
**प्रबन्ध सम्पादकः**
**भारती-संस्कृत-मासपत्रिका**

# व्यापारिकवास्तुविमर्शः

❑ श्रीकृष्णचन्द्रशर्मा

विश्वस्य प्राचीनतमः ज्ञानराशिः वेदः वर्तते। वैदिकवाङ्मयं भारतीयजीवनदर्शनस्य सांस्कृतिकधरोहरस्य च अनुपममणित्वेन वर्तते। यस्य देदीप्यमानप्रभया प्रत्येकं मानवः पुराकालात् समृद्धो वर्तते।

जीवनं सुखमयं सुरक्षितं शान्तिमयञ्च कर्तुं याः याः मूलभूता आवश्यकताः भवन्ति तासु आवासव्यवस्थाऽपि मुख्यरूपेण अस्ति। आवासस्य सुव्यवस्थायाः विवेचनं वैदिकवाङ्मये कृतमस्ति। वेदानुशीलनेन ज्ञायते यत् प्रायः सर्वेषु वेदेषु वासव्यवस्थाविषयक "वास्तु" इत्यस्य ज्ञानं निहितं वर्तते।

**वास्तुशब्दस्य** व्युत्पत्तिः "वस् वासे" धातुना विहिता। अयं वस् धातुः कस्याऽपि एकस्मिन् स्थाने वासकरणम् इति द्योतयति। वास्तोः व्युत्पत्तिः इत्थं वर्तते **वसन्ति अस्मिन्** इति वास्तुः।

वास्तुशास्त्रस्य प्रमुखः प्रतिपाद्यविषय आवासीय-व्यावसायिक-भवन-देवालय-सरोवर-औद्योगिक-क्षेत्राणां रचनासिद्धान्त-प्रविधि-उपायादीनां व्याख्याकरणेन वर्तते।

वास्तोः वैदिकदेवस्य नाम वास्तोष्पतिः वर्तते। वास्तोष्पतिदेवाय सकलकल्याणकामनायाः प्रार्थना वारं वारं कृता वर्तते-

**ॐ वास्तोष्पते प्रतिजानीह्यस्मान्त्स्वा-**
**वेशोऽअनमीवो भवानः।**
**यत्त्वे महे प्रतितन्नो जुषस्व**
**शन्नो भव द्विपदे शं चतुष्पदे[1]।।**

1. ऋग्वेदः- 7/45

**वास्तुशास्त्रस्य भेदाः-**

भारतीयवास्तुशास्त्रं संस्कृतभाषायां निबद्धम् अतिप्राचीनशास्त्रं वर्तते यस्य विपुलं वाङ्मयं वर्तते। वास्तुविदां मतानुसारं वास्तुनियमैः निर्मितम् आवासीय-व्यावसायिक-धार्मिकभवनं तत्स्थितेभ्यः मानवेभ्यः सुख-शान्ति-समृद्धिञ्च प्रयच्छति। वास्तुशास्त्रं वैश्विकविज्ञानं सर्वाङ्गीणशास्त्रं वर्तते, यस्मिन् विज्ञान-शास्त्रादीनां निष्कर्षः साररूपेण निरूपितमस्ति।

सामान्यतया वास्तोः त्रयो भेदाः स्वीक्रियन्ते तद्यथा-

1. आवासीयवास्तुः।
2. व्यावसायिकवास्तुः।
3. धार्मिकवास्तुश्च।

वास्तुशास्त्रानुसारेण दिशः व्यवस्थीकृत्य आकाश-वायु-अग्नि-जल-भूमितत्त्वानां सन्तुलने मानवः तत्र समुत्पन्नैः प्रत्यक्ष-परोक्षदुष्परिणामै आत्मानं रक्षति।

**व्यावसायिकवास्तुः-**

व्यावसायिकवास्तुशास्त्रस्य तात्पर्यं व्यवसायाधारित-कार्यालय-शोरूम-विपणिप्रतिष्ठानादिना वर्तते।

व्यावसायिकवास्तुशास्त्रमपि वास्तुशास्त्रस्य सामान्यसिद्धान्तानाम् उपरि एव आधारितो वर्तते। परन्तु अत्र विश्रामालय-भोजनालय-चिकित्सालय-विद्यालय-चलचित्रमन्दिर-शॉपिंगमालेत्यादीनां पृथक्-पृथक् वर्तते। वर्तमानपरिप्रेक्ष्ये जनसंख्यावृद्धिः तथा च सर्वकारीयोद्योगेषु न्यूनताकारणात् जनाः व्यवसायं प्रति आकृष्टाः भवन्ति। यदि एतेषां व्यावसायिकप्रतिष्ठानानां निर्माणं वास्तुदृशा भवति तदा वास्तुजनितसमस्यानां

परिहारः भवितुं शक्यते। व्यावसायिककेन्द्राणां निर्माणाय सर्वप्रथमं भूखण्डस्य चयनं क्रियते। भूखण्डचयने सर्वप्रथमं भूखण्डाकृतिः परीक्ष्यते।

यदि भूखण्डः वर्गाकार-आयताकार-गोलाकार-सिंहमुखी-षट्कोणाकारः वा भवति तदा भूखण्डः शुभफलदायी भवति। गोलाकारभूखण्डे निर्माणमपि गोलाकारमेव करणीयम्। यदि भूखण्डस्य आकृतिः अनियमिता वर्तते तर्हि समुचितरीत्या आकृतिं प्रदाय निर्मातव्यम्।

व्यवसायनिर्धारणानन्तरं व्यापारिकपरिसरस्य चयनं क्रियते। व्यवसायप्रकृत्यानुसारमेका विशिष्टा दिशा भवति शुभफलदायिनी। दिशानुसारम् अनया रीत्या व्यापारस्य चयनं कर्तुं शक्यते-

**पूर्वदिशा-** रजतापणः, औषधकेन्द्रम्, पुस्तकालयः, वित्तप्रबंधनसंस्थानम्, प्रतियोगिता-संस्थानम्, वस्त्रागारः, सस्यबीजभंडारादयः।

**दक्षिणदिशा-** शास्त्रागारः, उपस्करापणः, भाण्डारशाला, मृत्तिकातैलापणः, शाकापणः, वाहन-शाला, सुरक्षाकेन्द्रम्, दूरसंचारकेन्द्राणि च।

**पश्चिमदिशा-** उपानहापणः, लौहयन्त्रागारः, कोला-अयस्कापणः, घृत-तैलापणः काष्ठागारः, मधुशाला, पुरातत्त्वकेन्द्रादि।

**उत्तरदिशा-** जलकेन्द्रम्, मुक्ता-पुष्प-तण्डुल-मिष्ठान्नापणः, सौन्दर्यप्रसाधनम्, ज्योतिषकार्यालयः[2] विद्यालयः भोजनालयादयः[3]।

दक्षिणदिशा भौतिकसमृद्धेः परिचायिका भवति। ग्रहानुकूलतायां व्यापाराय सर्वश्रेष्ठा वर्तते दक्षिणदिशा।

2. वास्तुशास्त्र का सरल एवं व्यावहारिक ज्ञान, पृ. 168

3. वास्तुप्रबोधिनी-पृ. 135

यदि व्यापारः सर्वथा नवीनः भवति तदा पूर्वदिशा सिद्धा भवति[4]।

**व्यावसायिकभूखण्डनिर्माणे ध्यातव्यबिन्दवः-**

व्यापारिकभवनेषु (लघु आपणः, बहुतलीय-व्यापारिकभवनानि, डिस्ट्रकसेन्टर, महाहट्टादि) भूखण्डचयनविचारः, भूमिपरीक्षणम्, प्लववेधादीनां ज्ञानं आवासीयवास्तुवदेव करणीयम्।

व्यापारिकप्रतिष्ठानाय भूखण्डः सिंहमुखी वर्गाकारः, आयताकारः चतुरस्रो वा सर्वोत्तमः भवति।

व्यावसायिकभूखण्डं चतुरस्रं कृत्वा निर्माणं समुचितं भवति। एनं भूखण्डं दक्षिणपश्चिमापेक्षया उत्तर-पूर्वं प्रति अधः करणीयः।

उत्तर-पूर्वदिक्मध्ये रिक्तस्थानं भवेत्।

पूर्व, पश्चिम, उत्तरादित्रिदिग्भिः मार्गयुक्तं भवनं व्यापारिकसंस्थानाय उत्तमं भवति[5]।

व्यावसायिककेन्द्रस्य मुख्यद्वारम् उच्चकोणान्तर्ग-तत्वेन ईशानकोणस्य उत्तरे, पूर्वी-ईशाने, आग्नेयकोणस्य दक्षिणभागे, वायव्यकोणस्य पश्चिमभागे स्थापनीयम्[6]।

उत्तर-पूर्ववृद्धियुक्त भूखण्डः सर्वथा लाभदायी भवति।

भूखण्डस्य सम्मुखे वेधः न भवेत्।

व्यापारिकप्रतिष्ठानेषु यानस्थलाय वायव्यदिशा उपयुक्ता भवति। भूतले अपि याननिवेशः उत्तर-पश्चिमदिशायाम् उपयुक्तो भवति[7]।

यदि वायव्ये माननिवेशाय स्थानं नोपलभ्यते तर्हि आग्नेयकोणमपि भवितुं शक्यते। पश्चिम, दक्षिणदिशा अपि उपयुक्ता भवति[8]।

4. तत्रैव 5. कमर्शियलवास्तु. पृ.-88

6. वास्तुशास्त्रसारः, पृ.-61

7. मंगलमयवास्तुविज्ञान, पृ. 69

8. कमर्शियलवास्तु. पृ.-138

प्रशासनिकभवनस्य स्थितिः उत्तरदिशि, पूर्वदिशि, नैर्ऋत्यकोणे शुभदा भवति।

औद्योगिकभवने प्रकाश-वायोः सञ्चारणाय दक्षिणदिशि वातायनानि अधिकानि स्थापनीयानि।

**विभिन्नव्यावसायिककेन्द्राणाम् आन्तरिकसज्जा-**

**विश्रामालयः भोजनालयश्च-** विविधप्रसिद्ध-स्थलेषु नगरेषु वा आगन्तुकानां पर्यटकानां वास-व्यवस्थायै विविधप्रकाराणां विश्रामालयानां बाहुल्यं दृश्यते अद्यत्वे। विश्रामालयानां निर्माणं वास्तुनियमानां परिपालनं कृत्वा भवति तदा उत्तमफलदायकं भवति।

मुख्यद्वारम् उत्तर-ईशानयोर्मध्ये, पूर्व-ईशानयोर्मध्ये वायव्यपश्चिमयोर्मध्ये वा सर्वोत्तमं भवति।

स्वागतकक्षः प्रवेशद्वारस्य पार्श्वे दक्षिणदिशि, पश्चिमदिशि वा प्रकल्पनीयः।

विश्रामालये उद्यानम् उत्तरदिशि शुभदं भवति।

पाकशाला आग्नेये, जलपानकक्षः दक्षिणे पश्चिमदिशि वा निर्मातव्यः।

तरणतालः पश्चिमे, उत्तरे, पूर्वदिशि वा निर्मातुं शक्यते।

भूतलस्य नैर्ऋत्यभागे भण्डारगृहम् उचितं भवति।

प्रमुखस्य कक्षः नैर्ऋत्यभागे निवेशनीयः।

विश्रामालयस्य भूमितले भोजनालयस्य विधानं समुचितमेव प्रतीयते।

एतदतिरिच्य सन्दर्भेऽस्मिन् प्रयुक्तानाम् अन्येषाम् आवासीय-व्यावसायिकवास्तुनियमानां परिपालनम् अवश्यमेव करणीयम्।

**वस्त्रापणः-**

वस्त्राणि पूर्वपश्चिमदिशापेक्षया दक्षिणदिशि स्थापनीयानि।

धनकोशः उत्तरदिशि स्थापनीयः।

उपवेशनव्यवस्था पूर्वोन्मुखी उत्तरमुखी वा प्रकल्पनीया।

भित्तिषु श्वेतः पाटलवर्णः वा लेपनीयः।

द्वितलाधिकापणेषु सोपानानि दक्षिण-पश्चिमे स्थापनीयानि[9]।

विक्रयवर्धनाय सामग्र्यः वायव्ये स्थापनीयाः।

**औषधापणः-**

औषधं पूर्वस्याम् उत्तरदिशि वा, शल्यसम्बद्धोप-करणानि दक्षिणदिशि, औषधकूप्यः वायव्य-ईशानकोणे स्थापनीयाः।

नैर्ऋत्यकोणे अप्रयुक्त-औषधसामग्र्यः प्रकल्पनीयाः।

प्रशीतकम् आग्नेय्यां दक्षिणदिशि वा स्थापनीयम्।

रक्तपरीक्षणोपकरणानि दक्षिणदिशि स्थापनीयानि।

**चिकित्सालयः -**

शल्यचिकित्साकक्षः रक्तपरीक्षणकक्षः दक्षिणदिशि भवति तदा उत्तमपरिणामाः समायान्ति।

अस्थिसंधानककक्षः पश्चिमदिशि शुभदायी भवति।

स्त्रीरोग-प्रसूतिकक्षः, एक्सरे उपकरणानि नैर्ऋत्य-कोणे शुभदायकानि भवन्ति।

कर्ण-नासिका-ग्रीवाचिकित्सकाः उत्तरोन्मुखी भवन्ति तथा रोगिणाः रोगमुक्ताः शीघ्रं भवन्ति।

प्राथमिकचिकित्साकक्षः ईशान-उत्तरदिशि स्थापनीयः।

आपातकालीनकक्षः वायव्यकोणे प्रकल्पनीयः।

रोगीवाहनं वायव्य, पूर्व, उत्तरदिशि वा निवेशनीयम्।

9. वास्तुशास्त्रसारः, पृ. 139

बाह्यचिकित्साविभागः (ओ.पी.डी.) पूर्वदिशि स्थापनीयः।

चिकित्सकावासः पश्चिम, दक्षिणदिशि वा प्रकल्पनीयः[10]।

**शीतलपेयकेन्द्रम्-**

प्रशीतयन्त्रं दक्षिणदिशि स्थापनीयम्।

रिक्तकूप्यः पश्चिमदिशि स्थापनीयाः।

दुग्धसामग्री वायव्यकोणे स्थापनीयाः।

फलरसयन्त्रं (ज्यूसयंत्रम्) सम्मुखे काउंटरोपरि स्थापनीयम्।

दधि उत्तरदिशि स्थापनीयम्।

**विद्यालयः-**

विद्यालयस्य प्रवेशद्वारं पूर्व, ईशान, उत्तरदिशि वा भवेत्।

विद्यालयनिर्माणाय आंग्लाक्षरस्य U.L. आकृतिः शुभदा भवति।

कक्ष्याकक्षे श्यामफलकम् उत्तर, पूर्वदिशि स्थापनीयम्। येन छात्राः उत्तर-पूर्वोन्मुखिनः भूत्वा पठेयुः।

क्रीडास्थलं पूर्व-उत्तरदिशि भवेत्।

प्राचार्यकक्षः नैऋत्यकोणे प्रभावशाली भवति[11]।

स्वागतकक्षः ईशानकोणे, अध्यापकविश्रामकक्षः ईशाने वायव्ये वा स्थापनीयम्।

पुस्तकालयः वाचनालयश्च पश्चिमदिशि भवति तदा छात्रा एकाग्रमनसा पठन्ति।

प्रयोगशाला आग्नेयकोणे शुभदा भवति।

10. वास्तुशास्त्र का सरल एवं व्यावहारिक ज्ञान, पृ.-162

11. भारतीयवास्तुशास्त्र पृ. 37

जलपानगृहम् आग्नेयकोणे स्थापनीयम्।

बालिकाछात्रावासः वायव्य-उत्तरमध्ये, बालक-छात्रावास उत्तर-ईशानमध्ये निर्मातव्यः।

परीक्षाविभागः पश्चिमदिशि, प्राशासनिककक्षः पूर्वे, लेखाविभागः उत्तरदिशि स्थापनेन शुभदायको भवति।

अनया रीत्या व्यावसायिककेन्द्राणि वास्तुसम्मतानि भवन्ति तदा मानवः सुख-शान्ति-समृद्धिञ्च अवाप्य स्वजीवनम् उत्कृष्टं करोति।

**सन्दर्भग्रन्थाः-**

1. भारतीयवास्तुशास्त्रम्, प्रो. वासुदेवशर्मा, राष्ट्रिय-संस्कृतसंस्थानम्, नवदेहली।

2. भारतीयवास्तुशास्त्रम्, प्रो. शुकदेवचतुर्वेदी, श्रीलाल-बहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठम्, नवदेहली

3. वास्तुप्रबोधिनी, प्रो. विनोदशास्त्री, मोतीलाल-बनारसीदास।

4. वास्तुशास्त्रसार, प्रज्ञानन्दसरस्वती, चौखम्भासुरभारती वाराणसी।

5. वास्तुशास्त्र सरल एवं व्यावहारिक ज्ञान, डॉ. शालिनीकृष्णाखरे, चौखम्भासंस्कृतसंस्थानम्।

6. भारतीयवास्तुविद्या के वैज्ञानिक आधार, डॉ. बिहारीलाल शर्मा , मान्यताप्रकाशन, नवदेहली।

7. कमर्शियलवास्तु, डॉ. भोजराजद्विवेदी, डायमंड-पाकेटबुक्स, नवदेहली।

**शोधच्छात्रः**

**वास्तुशास्त्रविभागः**

**श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयः**

**नवदेहली**

**मो. 8058313156**

# श्रीरामः परमेश्वरः

(श्रीमद्वाल्मीकीय-रामायणानुसारम्)

❑ सोहनलाल शर्मा

''प्रचेतसोऽहं दशमः पुत्रो राघवनन्दनेति'' प्राचेत-समकल्मषं वल्मीकभुवं मुनिपुङ्गवमादिकविं भगवन्तं वाल्मीकिं तत्प्रणीतं कौञ्चद्वन्द्ववियोगोत्थेन शोकेन मा निषाद प्रतिष्ठां त्वमिति काव्यात्मभूतश्लोकोद्गारेण प्रस्फुटितमादिकाव्यं रुचिरवर्णपदभावरमणीयं रीति-गुणालङ्कारव्यङ्ग्यार्थकमनीयं सहृदयहृदयावर्जकं प्रावृच्छरद्वसन्तसंध्याप्रभातशैलसस्तिडागवनसमुद्रा-दीनामालङ्कारिकवर्णनेन मनोरमं नवरसरुचिरं परमङ्गित्वेन करुणरसपरिपूर्णमाध्यात्मिकदृशा यस्य एकैकमक्षरं पुंसां महापातकनाशनमर्वाचीनानां काव्यप्रणेतॄणामादर्शभूतं पठनीयं श्रावणीयं श्रोतव्यमनवद्यं रामायणञ्च लोके को नु जानाति।

सम्राजः दशरथस्य वेश्मनि ऋष्यशृङ्गेण कारिते पुत्रेष्टियज्ञे भागप्रतिग्रहार्थं समागताः देवाः रावणवध-स्योपायं कर्तुं ब्रह्माणं प्रार्थयन्ति। एतस्मिन्नवसरे तत्रोपयातं विष्णुमेव सन्नताः सर्वे देवाः रावणवधकर्मणि नियोजयन्ति-

**''त्वां नियोक्ष्यामहे विष्णो लोकानां हितकाम्यया।**
**राज्ञो दशरथस्य त्वमयोध्याधिपते विभो।।''**

**-रामायणे बालकाण्डम् 15/19**

**अस्य भार्यासु तिसृषु ह्रीश्रीकीर्त्युपमासु च।**

**- बाल. 15/20**

**विष्णो पुत्रत्वमागच्छ कृत्वाऽऽत्मानं चतुर्विधम्।।**

**- बाल. 15/21**

तदनन्तरमेवम्-

**''कौशल्याजनयद् रामं दिव्यलक्षणसंयुतम्।**
**विष्णोरर्धं महाभागं पुत्रमैक्ष्वाकुनन्दनम्।।''**

**-बाल. 18/10-11**

कौसल्याजनयद् रामं विष्णोरर्धमहाभागं, कैकेय्यां जातः भरतः साक्षात् विष्णोश्चतुर्भागः, सुमित्रा जनितौ लक्ष्मणशत्रुघ्नौ विष्णोरर्धसमन्वितावास्ताम्। एवं चत्वारो भ्रातरः विष्णोरंशसम्भूता एव किन्तु रामस्तु विष्णो-रर्धमहाभागत्वेन धरण्यामवतरितः।

प्रथमं राजा सुमतिः रामलक्ष्मणौ दृष्ट्वा महामुनिं विश्वामित्रमेवं पृच्छति-

**''इमौ कुमारौ भद्रं ते देवतुल्यपराक्रमौ।**
**गजसिंहगती वीरौ शार्दूलवृषभोपमौ।**

**-बाल. 48/02**

**अश्विनाविव रूपेण समुपस्थितयौवनौ।**

**-बाल. 48/03**

इमौ पराक्रमे देवतुल्यौ, मन्ये देवलोकादिहामरौ संप्राप्तौ, तयोः गतिः रूपं यौवनञ्च सामान्यतोऽधिकं वैशिष्ट्यमावहन्तीति सुमतेर्मतम्। एवमेव जनकपुर्यामपि रामलक्ष्मणौ दृष्ट्वाऽभिभूतस्य विश्वामित्रं प्रति महाराजस्य

जनकस्योक्तिः द्वावेतावमराविव दृश्येते-

**''यदृच्छयेव गां प्राप्तौ देवलोकादिवामरौ।**
**कथं पद्भ्यामिह प्राप्तौ किमर्थं कस्य वा मुने।।''**
**-बाल. 50/19**

तौ दृष्ट्वा राज्ञोः सुमतिजनकयोः विचारसाम्यमवलोकनीयं वर्तते। यदा श्रीरामः वैष्णवं धनुरारोप्य परशुरामं निर्वीर्यं कृतवांस्तदा परशुरामः धनुषः परामर्शात् रामं ''मधुहन्तारमज्ञासीत्''-

**''अक्षय्यं मधुहन्तारं जानामि त्वां सुरेश्वरम्।**
**धनुषोऽस्य परामर्शात् स्वस्ति तेऽस्तु परंतप।।''**
**-बाल. 26/17**

जनस्थाने नान्य-सहायः श्रीरामः खरदूषणादीन् सकलान् राक्षसानवधीदित्यकम्पनमुखात् श्रुत्वा क्रुद्धो दशग्रीवोऽभाषत- मे विप्रियं कृत्वा स्वयमिन्द्रः वैश्रवणः यमः किं वा विष्णुः सुखं न प्राप्स्यन्ति। अहं तु- कालस्यपि कालः, ''दहेयमपि संक्रुद्धस्तेजसादित्य-पावकौ।'' परन्तु रावणादभयं प्राप्तः विस्रब्धः कृताञ्जलिरकम्पनः रामस्य बलं पौरुषं च वर्णयन् रावणं प्रबोधयति। रामस्तु स्वपराक्रमेण सर्वान् लोकान् संहृत्य पुनरपि प्रजाः स्रष्टुं समर्थः। तथा च-

**''सताराग्रहनक्षत्रं नभश्चाप्यवसादयेत्।**
**असौ रामस्तु सीदन्तीं श्रीमानभ्युद्धरेन्महीम्।।**
**- अरण्यकाण्डं 31/24**
**संहृत्य वा पुनर्लोकान् विक्रमेण महायशाः।**
**शक्तः श्रेष्ठः सः पुरुषः स्रष्टं पुनरपि प्रजाः।।''**
**- अरण्यकाण्डं 31/26**

अतः परमः पुरुषः रामः, सर्वं कर्तुं समर्थः।

सीतावियोगजन्येन शोकेन निद्राविरहितं वाष्पोपहतचेतनं रामं लक्ष्मणोऽब्रवीदनुनयं वचनम्- 'शोकं समुन्मूलय, त्वं तु ससागरां सवनां साचलां पृथिवीमपि परिवर्तयितुं शक्तः, रावणस्य तु का कथा'-

**''पृथिवीमपि काकुत्स्थः ससागरवनाचलाम्।**
**परिवर्तयितुं शक्तः किं पुनस्त्वं हि रावणम्।।''**
**- किष्किन्धाकाण्डम्, 17/27-38**

पृथिवीपरिवर्तनं कर्तुमीश एव समर्थः, रामस्येश्वरत्वमेतेन व्यज्यते। लङ्कायां हनुमान् रावणं स्वसामर्थ्यं कथयन् श्रीरामस्य पारमेश्वरीं शक्तिमपि वर्णयति। स एवमाह-अहमेकोऽपि सवाजिरथ-कुञ्जरां लङ्कां नाशयितुं शक्तः, किन्तु हर्यक्षगणसन्निधौ रामेण शत्रूणामुत्सादनाय प्रतिज्ञातम्। सः किं कर्तुं समर्थः- इति मम रामदासस्य सत्यं वचनं शृणुस्व-

**''सर्वांल्लोकान् सुसंहृत्य सभूतान् सचराचरान्।**
**पुनरेव तथा स्रष्टुं शक्तो रामो महायशाः।।**
**- सुन्दरकाण्डम्, 51/39**
**सर्वत्र सर्वभूतेषु सर्वकालेषु नास्ति सः।**
**यो रामं प्रतियुध्येत विष्णुतुल्यपराक्रमम्।।''**
**-सुन्दर. 51/41-42**

अत्रापि विष्णुतुल्यपराक्रमः श्रीरामः ''सर्वान् लोकान् सुसंहृत्य पुनः स्रष्टुं समर्थस्तथा चतुराननो ब्रह्मा, त्रिनेत्रस्त्रिपुरांतकः सुरनायको महेन्द्रः स्थातुं समुद्यता युधि राघवस्य'' प्रतिपादितः।

देवाः धर्मानुयायिनः। त्वया च गृहीतोऽधर्मः सर्वानस्मान् ग्रसते। सर्वेषां राक्षसानां विनाशं पश्यामि।

विपरीतानि निमित्तान्युत्पतन्ति। विचार्य कथयाम्यहं भवन्तं-यत्त्वं रामेण सह सन्धिं कुरुस्व। नायं राम:साधारणो मानुष:-किन्तु विष्णुरेवेति माल्यवान् रावणमभाषत-

**''विष्णुं मन्याहे रामं मानुषं रूपमास्थितम्।**
**न हि मानुषमात्रोऽसौ राघवो दृढविक्रमः।।''**

**-युद्ध. 35/35**

**''कुरुस्व नरराजेन सन्धिं रामेण रावण।''**

**-युद्ध. 35/36**

लक्ष्मेणन कृतस्यातिकायस्य वधं श्रुत्वा चिन्तातुरो रावण: वचनमिदमब्रवीत्-शरबन्धात् तौ भ्रातरौ कथं विमुक्तावभवताम्-तन्न जाने। ताभ्यां धूम्राक्षाकम्पन प्रहस्तकुम्भकर्णादय: महाबलशालिन: युद्धे विनिपा-तिता:। सलक्ष्मणं रामं युद्धे नाशयेदिति लङ्कायां कमपि वीरं न पश्यामि- ''अहो सुबलवान् रामो महदस्त्रबलं च वै।'' मन्येऽहं रामो नारायण एव। स पुनर्बभाषे-

**''यस्य विक्रममासाद्य राक्षसा निधनं गताः**
**तं मन्ये राघवं वीरं नारायणमनामयम्।।''**

**- युद्ध. 72/11**

रावणं निहतं दृष्ट्वा तस्य ज्येष्टा भार्या मन्दोदरी विलपन्ती तमुवाच-त्वं तु त्रैलोक्यविजेताऽऽसीत्। मानुष: वनगोचर: राम: त्वां हन्तुं कथं समर्थोऽभूत्। रामरूपेण स्वयं काल एवागत:। रामस्तु सनातन: परमात्मा ज्ञायते। पतिव्रताया: सीतायास्तेजसा दग्धत्वं पापानां कर्मणां फलमवश्यमेव लप्स्यते। रामस्तु मानुषरूपेण विष्णु:। सा रावणमगादी-राम: किं पुन: -

**''अनादिमध्यनिधनो महतः परमो महान्।**
**तमसः परमो धाता शङ्खचक्रगदाधरः**
**श्रीवत्सवत्सा नित्यश्रीरजय्यः शाश्वतो ध्रुवः।।''**

**- युद्ध. 111/12**

**''खरस्तु निहतो भ्राता तदा रामो न मानुषः।''**

**-युद्ध. 111/15**

सा स्पष्टमभाषिष्ट-रामो न मानुष, तव वधार्थं विष्णु: मानुषो भूत्वा क्षितावागत:।

सीताया अग्नौ प्रवेशानन्तरं ब्रह्मणा सह समागता: सर्वे देवा: श्रीरामं स्तुवन्ति, तस्य भगवत्तामप्येवं प्रतिपादयन्ति-

**''अन्ते चादौ च मध्ये च दृश्यते च परंतप।**
**उपेक्षसे च वैदेहीं मानुषः प्राकृतो यथा''**

**- युद्ध. 117/09**

त्वं तु त्रयाणामपि लोकानां कर्ता, आदिमध्यान्तेषु सर्वत्र भवानेव दृश्येत तत्कथं प्राकृतपुरुषवत् हव्यवाहने पतन्तीं सीतामुपेक्षसे, समर्थोऽपि। लोकपालैरेवमुक्त: राघव: त्रिदशश्रेष्ठानेवमुवाच-अहं तु-

**''आत्मानं मानुषं मन्ये रामं दशरथात्मजम्।**
**सोऽहं यश्च यतश्चाहं भगवाँस्तद् ब्रवीतु मे।।''**

**- युद्ध. 117/11**

मानुषोऽहं, दशरथपुत्रोऽहं, सोऽहं, योऽहं यतोऽहं भगवाँस्तद् भाषताम्। एवं ब्रुवाण: श्रीराम: प्रच्छन्नरूपेण स्वस्य भगवत्तामपोषयत्।

तदनन्तरं ब्रह्माऽपि रामस्य नारायणत्वं लोकानामा-दिकर्तृत्वं चोद्घोषयति-

**त्रयाणामपि लोकानामदिकर्ता स्वयंप्रभुः।**

**- युद्ध. 117/18**

यदाऽग्निदेवः रामाय सीतां समर्प्य तस्याः पवित्रतां प्रमाणयति- तदा दशरथस्तत्र विमानेनागत्य रामं बाहुभ्यां संपरिष्वज्याङ्के समारोप्यैवमभाषत-

**''इदानीं च विजानामि यथा सौम्य सुरेश्वरैः।**
**वधार्थं रावणस्येह पिहितं पुरुषोत्तमम्।।''**

**- युद्ध. 117/18**

वस्तुतस्त्वं तु पुरुषोत्तमः किन्तु रावणवधार्थमिह देवैः भवतः पुरुषोत्तमत्वं पिहितम्।

शम्बूकवधानन्तरं श्रीरामः कुम्भयोनेरगस्त्यास्याश्रमं प्राप्तस्तत्र भगवानगस्त्यः 'स्वागतं ते नरश्रेष्ठ दिष्ट्या प्राप्तोऽसि राघव' इति कथयित्वा सत्कृत्य च राममेव मुवाच-

**''त्वं हि नारायणः श्रीमांस्त्वयि सर्वं प्रतिष्ठितम्।**
**त्वं प्रभुः सर्वदेवानां पुरुषस्त्वं सनातनः।।''**

**- उत्तरकाण्डम्, 76/29**

''त्वं हि नारायणः, त्वं सर्वेषां प्रभुः, त्वञ्च सनातनः पुरुषः'' कथनमिदं श्रीरामस्य परमेश्वरत्वं साधयति।

अन्ते च देवैः महात्मभिर्ऋषिभिश्च परिवृतः ब्रह्मा तत्राययौ यत्र रामः स्वर्लोकं गन्तुं समुद्यत आसीत्। तस्मिन् समये पितामहः राममन्तरिक्षादभाषत-

**''आगच्छ विष्णो भद्रं ते दिष्ट्याः प्राप्तोऽसि राघव।''** - **उत्तर. 110/08**

**''भ्रातृभिः सह देवाभैः प्रविशस्व स्विकां तनुम्।''**

**- उत्तर. 110/09**

ब्रह्मणा कृतेन ''विष्णो'' सम्बोधनेन रामः साक्षात् विष्णुस्वरूपः परमेश्वरः एव स्पष्टं द्योतितमत्र। एवं पितामहस्य वचः श्रुत्वा सशरीरः रामः वैष्णवं तेजः प्रविवेश- **''विवेश वैष्णवं तेजः सशरीरः सहानुजः।।'' उत्तर. 110/12**

खरवधानन्तरं देवाश्चारणाश्च रामस्य महत्कर्म वीर्यञ्च प्रशंसन्ति-

**''अहो वीर्यमहो दाढ्यं विष्णोरिव हि दृश्यते।''**

**अरण्य. 30/32**

अत्रापि श्रीरामस्तान् विष्णोरिव हि दृश्यते। श्रीरामः दुन्दुभे शरीरं लीलयैव पादाङ्गुष्ठेन दशयोजनं चिक्षेप- एतेन तस्य मानुषादसाधारणत्वं स्पष्टम्।

लङ्कायामपि हनुमान् सीतासमक्षं श्रीरामस्यातिशयं पौरुषं शौर्यञ्चाकथयत्-तेनापि श्रीरामस्यामानुषकर्म कर्तुः सामर्थ्यं द्योतितम्-

**''नहि पश्यामि मर्त्येषु नासुरेषु सुरेषु वा।**
**यस्तस्य वमतो बाणान् स्थातुमुत्सहतेऽग्रतः।।''**

**- सुन्दर. 39/15**

श्रीरामः स्वीयैराशीविशोपमैः शरैः समुद्रं शोषयितुं समर्थः - अहो श्रीरामस्यात्मबलं पराक्रमश्च- **''अद्य त्वां शोषयिष्यामि सपातालं महार्णव।'' (युद्ध. 22/01)** एवं विशिष्टैस्तथा रावणादिशत्रुभिश्च विष्णुस्वरूपेण प्रशंसितः श्रीरामः साक्षात् परमेश्वरः विष्णुरेवेति।

**पूर्वनिदेशकः**
**संस्कृत शिक्षा-विभागः, राजस्थानम्**
**मो.: 8946863430, 9928433350**

# आध्यात्मिकसुभाषितानि
# ( केनोपनिषदः )

❑ डा. नाथूलालसुमनः

**यद्वाचानभ्युदितं येन वागभ्युद्यते।**
**तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते।। 104।।**

(जो (ब्रह्म) वाणी से प्रकाशित नहीं है, किन्तु जिस (ब्रह्म) के द्वारा ही वाणी प्रकाशित होती है, उस (आत्मस्वरूप) को ही तू ब्रह्म जान, जिस (अनात्मस्वरूप वस्तु) की लोक उपासना करता है वह ब्रह्म नहीं है।)

**यन्मनसा न मनुते येनाहुर्मनो मतम्।**
**तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते।। 105।।**

(जिसका मन के द्वारा मनन नहीं किया जाता, किन्तु जिसके द्वारा मन मनन किया हुआ कहा जाता है उस (आत्मा) को ही तू ब्रह्म जान, जिस (अनात्म वस्तु) की लोक उपासना करता है वह ब्रह्म नहीं है।)

**यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यति।**
**तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते।। 106।।**

(जिसे कोई नेत्र से नहीं देखता, किन्तु जिसके द्वारा नेत्र (वस्तुओं को) देखते हैं उस (आत्मा) को ही तू ब्रह्म जान, जिस (वस्तु) की लोक उपासना करता है वह ब्रह्म नहीं है।)

**यच्छ्रोत्रेण न शृणोति येन श्रोत्रमिदं श्रुतम्।**
**तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते।। 107।।**

(जिसे कोई कान से नहीं सुनता, किन्तु जिसके द्वारा यह श्रोत्रेन्द्रिय सुनी जाती है इसी (आत्मा) को तू ब्रह्म जान, जिस (वस्तु) की लोक उपासना करता है वह ब्रह्म नहीं है।)

**यत्प्राणेन न प्राणिति येन प्राणः प्रणीयते।**
**तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते।। 108।।**

(जो घ्राण (नासिका) इन्द्रिय के द्वारा ग्रहण नहीं किया जाता, किन्तु जिसके द्वारा यह घ्राण इन्द्रिय अपने विषय गन्ध को ग्रहण करता है, उसी (आत्म-तत्त्व) को तू ब्रह्म जान, जिस (वस्तु) की लोक उपासना करता है वह ब्रह्म नहीं है)

जो सब इन्द्रियों का विषय नहीं है अपितु उसके द्वारा ही सब इन्द्रियाँ अपने-अपने विषयों में प्रवृत्त होती हैं वही ब्रह्म है।

मुण्डकोपनिषद भी यही प्रमाणित करता है- "तस्य माया सर्वमिदं विभाति।" 2.2.10 अर्थात् उस परब्रह्म के प्रकाश से ही सूर्य आदि सम्पूर्ण जगत् प्रकाशित होता है। इसी प्रकार श्रीमद्भगवद्गीता में भगवान् श्रीकृष्ण ने अर्जुन को यही उपदेश दिया है- "क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत। " 13.3.3 अर्थात् क्षेत्रज्ञ आत्मा सम्पूर्ण क्षेत्र को प्रकाशित करता है।

# अस्माकं गुरवः

( गताङ्कादग्रे )

❑ वेणीमाधव गो. धर्माधिकारी

**राष्ट्रियाः श्रद्धापुष्पाञ्जलयः-**

श्रीमतां गुरुमहाभागानां स्मृतौ विभिन्नानां सन्त-जनानां, नेतॄणां च श्रद्धाकुसुमान्यर्पितानि बभूवुः। आचार्याः श्रीविनोबाभावेमहोदया अवदन् श्री गुरुमहाभागेषु संकीर्णता लेशमात्रमपि नासीत्। ते विशुद्धेन राष्ट्रियभावेन कार्यं कुर्वन्तः स्म। इस्लामाद्यन्य-धर्मेष्वपि तेषां पूर्णा निष्ठा आसीत्। तेषामपेक्षासीत् भारते न कोपि पृथक् स्यात्। जगन्नाथपुर्याः शङ्कराचार्यमहोदयैः कथितम्- "गुरवः श्वेतवस्त्रेषु सन्त एवासन्। जैनाचार्य-मुनिसुशीलकुमारैः कथितं गुरवः संस्कृतेः महामानवरूपा आसन्। जैनसन्तैराचार्यतुलसीमहोदयैः कथितं गुरवः समालोचकत्वे गुणग्राहितायां च धनिनः आसन्।" संसदः सदने राष्ट्रपतिना वी.वी. गिरिणा, लोक-सभाध्यक्षेण गुरुदयालसिंहढिल्लोमहोदयेनान्यैश्च गुरुमहा-भागानां गुणानुवर्णनं कृतम्।

देशस्य प्रधानमन्त्रिणा इन्दिरागान्धिमहाभागया कथितम्- "यः सदनस्य सदस्यो नास्ति, एतादृशः प्रतिष्ठित एको महापुरुषः गोलवलकरः पञ्चत्वं गतः।" स विद्वानासीत्, आस्थावान् शक्तिशाली चासीत्। स्वस्य प्रभाविना व्यक्तित्वेन, वैचारिकदृढनिश्चयेन च राष्ट्रजीवने तस्य महत्त्वपूर्णं स्थानमासीत्। कांग्रेसस्यैव श्रीश्याम-नन्दनमिश्रेणोक्तम्-ते श्रेष्ठाः कर्मयोगिन आसन्, आत्म-ज्ञानिनश्चासन्। समाजवादिनायकेन समरगुहामहोदयेन कथितम् तैः राष्ट्रीयकार्येषु समर्पणस्य देशभक्तेः सेवायाश्च भावाः सहस्रेषु तरुणेषूत्पादिताः। अपरेण नेत्रा एम.एम. जोशीमहोदयेन कथितम्-श्रीगुरवस्तपस्विन आसन्। अकालीदलनेत्रा जत्थेदारेण श्रीसन्तोषसिंहेन कथितम्-श्रीगुरवो महापुरुषा आसन्। तादृशाः पुरुषास्त्वमरा भवन्ति। तेषां देहावसानेन सिक्खसमाजस्य महती क्षतिः संजाता। मार्क्सवादिदलस्य श्रीमता तकीरहमानेन कथितम्, यद्यपि मया श्रीगुरुमहाभागानां दर्शनं नैव कृतम् तथापि देशस्योज्ज्वलभविष्यार्थं तेषामादर्शेषु विश्वसतां जनेषु तेषां प्रेरणाशक्तेरनुभवो मया कृतः।

कांग्रेसदलनायकेन श्रीमता हाफिजुद्दीनकुरेशी-महोदयेनाप्युक्तम्- ते वस्तुतो महापुरुषा आसन् न ते मुस्लिमविरोधिनः अपितु मुस्लिमविरोधमाश्रित्याद्यावधि जना भ्रामिताः। श्रीमता जयप्रकाशनारायणेन कथितम्-श्रीमन्तो गुरवः आध्यात्मिका विभूतिरासीत्। तैः सत्याया राष्ट्रीयताया बोधनेन सहस्रशो जनाः जागरिताः कृताः।

सम्पूर्णदेशस्य विभिन्नविचारवद्भिः प्रमुखपत्रकारैरपि गुरुमहाभागानामसामान्यव्यक्तित्वे चिन्तने च प्रकाशः कृतः। तदतिरिक्तं राष्ट्रसेविकासमितेः सञ्चालिकया श्रीमत्या मातृस्वस्रा केलकरमहाभागया, भारतीयजन संघाध्यक्षेण लालकृष्ण अडवानी महोदयेन, अटल-बिहारिमहोदयेनान्यैश्च नेतृभिः श्रद्धाञ्जलिः समर्पितः।

**नूतनो भगीरथो नूतना च गंगा -**

सारांशे राष्ट्रजीवनस्य नूतनप्रवर्त्तकरूपे स्वस्या-सामान्यव्यक्तित्वेन कृतित्वेन च राष्ट्रजीवनार्थमनुपमां मानसिकशक्तिं प्रदातुं गुरुमहाभागानां विषये संघस्य वरिष्ठाधिकारिणां बाबूराववैद्यमहाभागानां शब्देषु-भगीरथः कठिनं तपः कृत्वा स्वर्गे प्रवहन्तीं गंगामानयत् भारतञ्च सुजलं सुफलमकरोत् तथैव प.पू.डा. हेडगेवार-महोदयाः मुक्तिमार्गप्रस्थितं गुरुमहाभागानां जीवनप्रवाहं भारतीयजनतायाः कल्याणार्थं धरातले समानीय हिन्दुसमाजं संगठितं सशक्तं च कर्तुं स्वेन प्रारब्धं कार्यं साफल्यं प्रत्यवर्द्धयत्।

**वर्णिताः सद्गुणास्सर्वे, ये गुरौ स्थानमाप्नुवन्।**
**लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति।।**

ब्रह्मपुरी, जयपुरम्

पुस्तकसमीक्षा

# वेदवाचस्पतिमधुसूदनओझाग्रन्थाः

❑ म.म. देवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

वेदविज्ञानपुरोधसो महामनीषिणो विद्यावाचस्पतेः समीक्षाचक्रवर्तिनः पं. मधुसूदनओझामहाभागस्य शतशो ग्रन्थाः प्रकाशिता विख्याताश्च किन्तु तत्प्रणीताः कतिपये ग्रन्था पाण्डुलिपिरूपे विद्यमाना अप्रकाशिता उपलब्धा अभूवन् वैद्यवरस्वामिलक्ष्मीरामप्रभृतीनां तत्सुहृदां संग्रहे। एवंविधेषु ग्रन्थेषु कतिपये सानुवादं सम्पाद्य प्रकाशिता गतेषु वर्षेष्विति प्रमोदास्पदम्। तादृश एको ग्रन्थः **''वेदार्थभ्रमनिवारणम्''** समीक्षितचरो भारत्याम्। ओझामहाभागस्य जयन्ती श्रीकृष्णजन्माष्टमी-दिवसे आयोज्यते। अस्मिन् वर्षे जयपुरस्थेन विश्वगुरुदीप आश्रमशोधसंस्थानेन समायोजिते ओझाजयन्तीसमारोहे तेषां ग्रन्थचतुष्टयस्य लोकार्पणं विहितं यस्मिन्नेको ग्रन्थो वेदार्थभ्रमनिवारणस्य नवीनं संस्करणमासीत् अपरे त्रयो ग्रन्था अप्यभूवन्।

**भुवनकोशः**- मधुसूदनमहाभागैः प्राचीनेतिहासस्य भूगोलस्य चापि विवेचनम् ''इन्द्रविजय'' नाम्नि ग्रन्थे कृतम्। एकस्मिन् संक्षिप्ते ग्रन्थे भूगोलस्य वर्णनं तैः कृतमस्ति यस्मिन् पृथिव्या गिरयः, द्वीपाः, ग्रहाणां प्रभावः, स्वर्गनरकादीनां सूचनाऽस्ति। पुराणसमीक्षा-ग्रन्थमालाया अयं ग्रन्थोऽस्मिन् वर्षे लोकार्पितः। प्रतिपृष्ठं प्रतिप्रघट्टकं हिन्द्यनुवादोऽप्यत्र प्रकाशितः।

**भूगतिविचारः** - अपरो ग्रन्थो ज्योतिषखगोलादिसम्बद्धोऽस्ति यत्र समीक्षणं कृतमस्ति यत्पाश्चात्त्याः सूर्यं स्थिरं, पृथिवीं च भ्रमणशीलां मन्यन्ते किन्त्वस्माकं शास्त्रेषु पराशरवराहमिहिरादीनां कोऽभिप्रायोऽस्तीति विवेचयता ग्रहाणां भ्रमणस्य चर्चा कृताऽस्ति भूभ्रमणस्याऽपि। पृथिव्या गोलाकारताऽस्माभिः सर्वदा मन्यते स्म, ''भूगोल'' शब्दः शताब्दीभ्यः प्रचलति किन्तु **भूभ्रमणं न स्वीकृतं** प्राचीनाचार्यैः (वराहमिहिरादिभिः)। एतस्य विवरणमस्ति ग्रन्थेऽस्मिन्। अयमपि हिन्द्यनुवादसहितः प्रकाशितः।

**सन्ध्याविज्ञानम्** - सन्ध्योपासना द्विजानां पावन-कर्तव्यत्वेन सम्मताऽस्तीति सुविदितम्। सन्ध्योपासने गायत्र्याः किं रहस्यं, काऽस्ति सावित्री, किमत्र विज्ञानम्? इत्यादयो विषयाः संक्षिप्तेऽस्मिन् ग्रन्थे प्रस्तुता आसन् ओझावर्यैः। तस्य सानुवादं प्रकाशनं स्वागतार्हम्।

**भुवनकोशः** - प्रणेता-पं. मधुसूदन ओझा, प्रधान-संपादकः स्वामी ज्ञानेश्वरपुरी, संपादकः डॉ. सुरेन्द्रकुमार शर्मा, प्रकाशकः विश्वगुरुदीप आश्रम शोधसंस्थान, कीर्तिनगर, श्यामनगर सोढाला, जयपुर पृ. सं. 40 मू. 80/- **भूगतिविचारः** लेखकादयः पूर्वोक्ताः, पृ. सं. 27 मू. 80/- **संध्याविज्ञानम्** लेखकादयः पूर्वोक्ताः, पृ. सं. 40 मू. 80/-

### अम्बेदकरजीवनचरितम्

अनेकेषामुपन्यासानां लेखकः, प्रतिष्ठितो विद्वान् पटियालानगर निवासी डॉ. महेश गौतमनाम्ना सुविदितो गीर्वाणवाणीपुरोधा ''अरुणा'', ''वैशाली'', ''सुनयना'' इत्यादीनामुपन्यासानां संस्कृते विलेखनं व्यधादिति मन्ये जानीयुः संस्कृतसेवकाः। विदुषाऽनेन सम्प्रति प्राञ्जले संस्कृते भारतीयसंविधाननिर्मातुः

समाजोद्धारकस्य दलितवर्गनेतृत्वविधया विश्वविदितस्य लोकनायकस्य डॉ. भीमराव अम्बेडकरस्य जीवनवृत्तमुपनिबद्धमिति ज्ञात्वा प्रसीदेयुः पाठकाः। अम्बेडकरमहाभाग इतिहासे सुप्रथितोऽस्ति। एतस्य जीवनचरित्रं भाषास्वनेकासूपनिबद्धमस्ति किन्तु संस्कृते नैतादृशं जीवनचरित्रं विद्यते इत्यस्य ग्रन्थस्य विशेषतः स्वागतं विधास्यते भारते इति विश्वसिमः।

भारतरत्नभूतस्य नेतुः अम्बेडकरस्य सम्पूर्णं जीवनवृत्तमिदं ''महार्हं रत्नमम्बेदकरः (जीवनचरितम्)'' इति शीर्षकं बिभर्ति। रामजीसकपालनामकस्य सूबेदार पदधारकस्य पत्नी भीमाबाई चतुर्दशसन्तानरूपेण भीमरावमजनिष्ट इति वृत्तमारभ्य सन् 1956 वर्षे दिसम्बरमासस्य षष्ठे दिनाङ्के भीमराव अम्बेडकरः संसारमिमं कथं त्यक्तवानितिवृत्तपर्यन्तं देशनेतुरस्य सम्पूर्णं जीवनवृत्तं चरित्रग्रन्थेऽस्मिन्नष्टस्वध्यायेषु समुपनिबद्धं येषां नाम ''आयाम'' इति कृतमस्ति लेखकेन। अष्टस्वायामेषु निबद्धमिदं जीवनचरित्रं हिन्द्यनुवादेन सह मुद्रितमस्तीति ग्रन्थस्यास्य विशेषः। प्रतिपृष्ठं प्रत्येकं प्रघट्टकेन सह हिन्द्यामनुवादोऽस्ति प्रकाशितः। अनेन सामान्यपाठकानां कीदृशी सुविधा स्यादिति स्पष्टमनुमातुं शक्यते।

डॉ. महेशगौतमस्य शैली प्राञ्जले प्रौढे च संस्कृते विनिबद्धा दृश्यते। तिङन्तानां पाण्डित्यपूर्णः प्रयोगः लिङन्तानां लुङन्तानां च क्रियापदानां विशिष्टः प्रयोग एतस्योपन्यासेषु स्पष्टतः परिदृश्यते पाठकैः। अस्मिन् ग्रन्थेऽपि तादृश्येव शैली समवलोक्यते। प्रतिप्रघट्टकं टिप्पण्योऽपि समाविष्टा यासु कठिनपदानां हिन्द्यामर्थः स्पष्टीकृतः।

ग्रन्थस्य प्रारम्भे पद्मभूषणप्रभृतिसम्मानैः सभाजितानां डॉ. सत्यव्रतशास्त्रिणां, पद्मश्रीप्रभृतिसम्मानैः सभाजितानां सुप्रथितानां डॉ. अभिराजराजेन्द्रमिश्रवर्याणां, राष्ट्रपतिसम्मानितानां डॉ. देवदत्तभट्टिवर्याणां, डॉ. रामेश्वरदत्तशर्मणामन्येषां च सुप्रथितानां विदुषां प्रशस्तय आशीर्वचांसि चात्र मुद्रितानि। जीवनवृत्तमिदं संस्कृतनिबद्धं निश्चितमेवाजरामरं भवेदित्याशासाना वयं समभिनन्दामो डॉ. महेशगौतममेतस्य प्रणयनमुपलक्ष्य।

**महार्हं रत्नमम्बेदकरः (जीवनचरितम्) ले. डॉ. महेशचन्द्रशर्मा गौतमः, प्रकाशकः निर्मल पब्लिकेशन, कबीरनगरम्, शाहदरा दिल्ली 94, पृ.सं. 247 मू. 700/-.**


## ऐसे बन सकते है आप भारती पत्रिका के ग्राहक :-

**भारती पत्रिका का वार्षिक शुल्क रुपये 150/–, पंचवर्षीय शुल्क 700/–, आजीवन सदस्यता (15 वर्ष) शुल्क 2100/– मात्र है। आप केनरा बैंक की किसी भी शाखा में जाकर हमारे निम्नलिखित खाते में राशि जमा करा कर जमा रसीद की फोटो प्रति ई–मेल से या डाक द्वारा भिजवा देवें।**

खाते का नाम – **भारतीयसंस्कृतप्रचारसंस्थान**

खाता संख्या – **2139101912498**

**IFS Code - CNRB0002139**

नारी-स्तम्भः

# गार्गी गुरूणां गुरुः

❑ डॉ. राजेश्वरी भट्टः

महत्तपसा बोधगम्येषु वेदान्त-व्याकरण-दर्शनादिषु गहनविषयेषु निष्णाता, प्रकाण्ड-पाण्डित्येन नैष्ठिकचरित्रेण च विद्वद्वृन्दे विख्याता, ब्रह्मवादिनी गार्गी युगयुगेभ्यो लोके स्मर्यते। प्रज्ञापारंगता 'वाचक्नवी गार्गी' गर्गगोत्रोद्भवस्य महर्षेर्वचक्नोः पुत्री आसीत्। गोत्रेणैव सा गार्गी नाम्ना प्रथिता जाता। बृहदारण्यकोपनिषदि तृतीयेऽध्याये 'जनकाश्वमेधप्रकरणे' गार्गी-याज्ञवल्क्ययोर्मध्ये प्रवर्तमाने ब्रह्मविषयके शास्त्रार्थे अधिगतपरमार्थाया धीमत्या गार्ग्याश्चमत्कृतिजनकं विशिष्टं वैदुष्यं वर्णनीयं वर्तते। बृहदारण्यकोपनिषदो ज्ञायते यत् कदाचित् परमतत्त्वजिज्ञासुना मिथिलाधिपेन जनकेन कृतार्थमात्मानं कर्त्तुं श्रेष्ठ-ब्रह्मविदः प्राप्तये बहुदक्षिणानामको यज्ञोऽनुष्ठितः। प्रज्ञापूजके पावनेऽस्मिन् पर्वणि मिथिलाधिपतिना ब्रह्मविषयक-शास्त्रार्थे विजेतुः ब्रह्मिष्ठस्य कृते सुवर्णमण्डित-शृङ्गधारिणीनां सहस्रगवां दानं घोषितम्। जनकेनाऽनुष्ठितेऽस्मिन् यज्ञे शास्त्रार्थस्य कृते दिग्दिगन्तरेभ्यो विशेषेण कुरुपाञ्चालप्रदेशेभ्यो ब्रह्मवेत्तारः समवेता जाताः। वाचक्नवी गार्गी अपि पण्डितप्रतिनिधिरूपेण तत्रोपस्थिताऽऽसीत्। ततो महाराजेन जनकेन कथितं 'हे ब्राह्मणाः! यूयं भगवन्तः परन्तु वः यः ब्रह्मिष्ठः स एताः गा उदजताम्।' (बृहदारण्यकोपनिषद्, तृतीयाध्यायः)

जनकस्य वचांसि श्रुत्वाऽपि ब्रह्मवित्सु कोऽपि गाः न अनयत्। सहसा शास्त्रार्थस्थले उपस्थितस्य महर्षेर्याज्ञवल्क्यस्य शिष्यस्तस्यादेशेन गाः नीतवान्। एवं गते विद्वत्सभायां समुपस्थिताः सर्वेऽपि ब्रह्मिष्ठाः कुपिता जाताः। ततो यज्ञे होतृरूपेण सम्मानितोऽश्वलः ऋषिः याज्ञवल्क्यं पप्रच्छ ''हे याज्ञवल्क्य नु खलु त्वं नः ब्रह्मिष्ठः असि'' याज्ञवल्क्य उवाच ''वयं ब्रह्मिष्ठाय नमः कुर्मः, वयम् एव गोकामाः स्मः।'' - (बृहदारण्यक उपनिषद 3 अध्यायः)

तदनन्तरम् अश्वलो गोदानविषये जनकस्य संकल्पं स्मारयित्वा याज्ञवल्क्यं ब्रह्मविषयक-दार्शनिकविषयानाधारीकृत्य प्रश्नानपृच्छत्। क्रमेण विद्वत्सभायां समुपस्थितैर्महर्षिजरत्कारु-आर्तभाग उषस्त कहोलादिभिरनेकैः ब्रह्मविद्भिः याज्ञवल्क्येन सह वाग्वैभवं प्रदर्शितम्। किन्तु याज्ञवल्क्यस्य उत्तरेण सर्वेऽपि धीमन्तः समाराधिता जाताः। अनन्तरं विद्वन्मल्लिका वाचक्नवी गार्गी अपि आत्मानं वारयितुं शक्ता न जाता। शास्त्रार्थस्थले समागत्य गार्गी याज्ञवल्क्यं पप्रच्छ ''याज्ञवल्क्य ! यदिदं सर्वम् अप्सु ओतं प्रोतं च कस्मिन्नु खल्वाप ओताश्च प्रोताश्चेति'' याज्ञवल्क्येन कथितं ''गार्गि! वायौ'' समीचीनमुत्तरं प्राप्यापि गार्गी विरता न जाता। इममेव प्रश्नं सा वायु, अन्तरिक्ष, गन्धर्वलोक, चन्द्रलोक, नक्षत्रलोक-देवलोक, इन्द्रलोक, प्रजापतिलोकानां किमधिकं ब्रह्मलोक-विषयेऽपि पृष्टवती। गार्ग्या समुत्थापितानां प्रश्नानाम् अविरतानुबन्धनेन विरज्य याज्ञवल्क्येन कथितं ''गार्गि मातिप्राक्षीर्मा ते मूर्धा व्यपतदनतिप्रश्न्यां वै देवतामतिपृच्छसि।'' याज्ञवल्क्यस्य वचनानि श्रुत्वा वाचक्नवी गार्गी विरराम। तदनन्तरं पारे ब्रह्मणि याता नैके विद्वांसो

**याज्ञवल्क्येन सह शास्त्रार्थे प्रवृत्ताः पराजिताश्च जाताः। ब्रह्मिष्ठानां सम्मत्या गार्गी पुनः याज्ञवल्क्यं प्रश्नद्वयं पृष्टवती। द्वयोः प्रश्नयोः सन्तोष- जनकमुत्तरं प्राप्य गार्गी ब्राह्मणानब्रवीत्। ''भगवन्तः ब्राह्मणाः तत् एव मन्येध्वम् यत् अस्मात् नमस्कारेण मुच्येध्वं वै युष्माकं कश्चित् इमं ब्राह्मणोद्यं जातु न जेता'' इति कथयित्वा गार्गी विरराम। गार्गीयाज्ञवल्क्ययोर्मध्ये प्रवृत्ते शास्त्रार्थे विदुष्यां गार्ग्यां प्रज्ञायाः चूडान्तनिदर्शनं प्राप्यते। गार्ग्या निर्णयेन शास्त्रार्थे ब्रह्मवित्सु याज्ञवल्क्य एव श्रेष्ठ आसीत्। मिथिलापतिना श्रेष्ठब्रह्मविदः कृते संकल्पिताः सुवर्णमण्डितशृङ्गधारिण्यः सहस्रगावः याज्ञ-वल्क्याय प्रदत्ताः। विदुषी गार्गी यद्यपि पञ्च-तत्त्वात्मकेन स्थूलदेहेन अत्र नास्ति किन्तु यशः शरीरेण सा अद्यापि नारीणां कृते प्रेरणास्त्रोतोऽस्ति। राजस्थानसर्वकारेण राज्ये प्रतिभाशालिनां छात्राणां कृते गार्गी-पुरस्कारस्य योजनाकारणेन विदुष्या गार्ग्या आत्मनश्च गौरवं वर्धितमस्ति।**

## हिन्दी-अनुवाद

कठिन परिश्रम से बोधगम्य वेद-वेदान्त-व्याकरण दर्शन आदि विषयो में निष्णात, प्रकाण्डपाण्डित्य एवं नैष्ठिक चरित्र के कारण विद्वद्वृन्द में विख्यात ब्रह्मवादिनी 'वाचक्नवी गार्गी' युगयुगों से लोक में स्मरणीय है। प्रज्ञा पारंगता गार्गी गर्गगोत्र में उत्पन्न महर्षि 'वचक्नु' की पुत्री थी। गर्ग गोत्र में उत्पन्न होने के कारण वे गार्गी नाम से प्रसिद्ध हुई। बृहदारण्यक उपनिषद् के तृतीय अध्याय में जनकाश्वमेधप्रकरण में गार्गी एवं याज्ञवल्क्य के बीच होने वाले ब्रह्मविषयक शास्त्रार्थ में परमतत्त्वज्ञानमेधाविनी गार्गी का चमत्कृतिजनक विशिष्ट वैदुष्य दर्शनीय है। बृहदारण्यक उपनिषद् से ज्ञात होता है कि कदाचित् परमतत्त्वजिज्ञासु मिथिलानरेश जनक ने अपने को कृतार्थ करने के लिए बहुदक्षिणा नामक यज्ञ का अनुष्ठान किया। प्रज्ञापूजक इस पावन अवसर पर जनक ने ब्रह्मविषयक शास्त्रार्थ में विजयी होने वाले ब्रह्मिष्ठ को स्वर्ण से मढ़े हुए सींगों वाली एक हजार गायें दान करने का संकल्प किया। जनकद्वारा अनुष्ठित यज्ञ में दिग्दिगन्तर से विशेषरूप से कुरुपाञ्चाल प्रदेश के ब्रह्म-वेत्ता एकत्रित हुए। पण्डित प्रतिनिधि के रूप में विदुषी गार्गी भी वहाँ उपस्थित थीं। इस अवसर पर जनक ने कहा आप सभी पूज्य हैं परन्तु आप में जो सबसे अधिक ब्रह्मनिष्ठ हो वह इन गायों को ले जाए। जनक के वचन सुनकर भी कोई विद्वान् गायों को नहीं ले गया। क्षणभर में शास्त्रार्थस्थल पर उपस्थित महर्षि याज्ञवल्क्य का शिष्य उन गायों को ले गया। इस घटना से समस्त ब्रह्मवेत्ता कुपित हो गए और यज्ञ में होता रूप से सम्मानित अश्वल ऋषि ने याज्ञवल्क्य से प्रश्न किया हे याज्ञवल्क्य ! क्या तुम निश्चयरूप से हम लोगों में सबसे अधिक ब्रह्मिष्ठ हो? याज्ञवल्क्य ने उत्तर दिया मैं ब्रह्मवेत्ताओं को नमस्कार करता हूँ। मैं केवल गौओं की कामना वाला हूँ। यह सुनकर यज्ञ में होता रूप से सम्मानित अश्वल ऋषि ने गोदान के विषय में राजा जनक द्वारा घोषित संकल्प का स्मरण दिलाकर याज्ञवल्क्य से दार्शनिक विषयों पर प्रश्न किए। उसके पश्चात् यज्ञस्थल पर उपस्थित महर्षि जरत्कारु-आर्तभाग, उषस्तु कहोल आदि ब्रह्मविदों ने याज्ञवल्क्य ऋषि के साथ शास्त्रार्थ में अपना अपना वाग्वैभव प्रदर्शित किया। किन्तु याज्ञवल्क्य के उत्तरों से सभी पण्डित प्रसन्न हुए। इस पण्डितचर्चा में प्रकाण्ड पण्डिता वाचक्नवी गार्गी भी अपने को रोक न सकी।

विदुषी गार्गी ने याज्ञवल्क्य से प्रश्न किया। हे याज्ञवल्क्य! यह सब जो दृश्यमान वस्तु जल में ओतप्रोत है तो जल किसमें ओतप्रोत है। याज्ञवल्क्य ने उत्तर दिया वायु में जल ओतप्रोत है। अपने प्रश्न का समीचीन उत्तर प्राप्त करके भी गार्गी रुकी नहीं अपितु यही प्रश्न उसने वायु अन्तरिक्ष, गन्धर्वलोक, चन्द्रलोक, नक्षत्रलोक, देवलोक, इन्द्रलोक, प्रजापतिलोक तथा ब्रह्मलोक के विषय में किया। गार्गी के द्वारा पूछे गए प्रश्नों की अविरतशृङ्खला से झुँझलाए हुए याज्ञवल्क्य ने कहा गार्गी मुझसे अधिक प्रश्न मत पूछो नहीं तो तेरा मस्तक गिर पड़ेगा। याज्ञवल्क्य के वचन सुनकर गार्गी रुक गई। उसके पश्चात् भी अनेक विद्वानों ने याज्ञवल्क्य के साथ शास्त्रार्थ किया एवं प्रश्नों का समाधान प्राप्त किया। पुन: ब्रह्मिष्ठों की सम्मति से गार्गी ने दो प्रश्न पूछे तथा दोनों का संतोषजनक उत्तर प्राप्त करके विद्वानों से बोली हे पूज्य ब्राह्मणों आपमें से कोई भी ब्रह्मवेत्ता इस ब्रह्मिष्ठ विद्वान् को नहीं जीत सकता है। गार्गी याज्ञवल्क्य के मध्य होने वाले शास्त्रार्थ में परम विदुषी गार्गी के वैदुष्य का चूडान्त निदर्शन प्राप्त होता है। विदुषी गार्गी के निर्णय के अनुसार शास्त्रार्थ में सभी ब्रह्मवेत्ताओं में याज्ञवल्क्य ही श्रेष्ठ थे। जनक ने शास्त्रार्थ में श्रेष्ठ सिद्ध होने वाले ब्राह्मण के लिए संकल्पित सोने से मढ़े हुए सींगो वाली एक हजार गायें प्रदान की। गार्गी यद्यपि अपने स्थूल शरीर से हमारे बीच नहीं है किन्तु अपनी कीर्त्तिकाया से आज भी वे नारियों के लिए प्रेरणा स्रोत हैं। राजस्थान सरकार ने राज्य में प्रतिभाशाली छात्राओं के लिए **गार्गी पुरस्कार** की योजना कर विदुषी गार्गी का एवं अपना गौरव बढ़ाया है।

---

**प्रेरकप्रसङ्गशतकम्** | **सप्ताशीतितमः प्रसङ्गः**

# अङ्गसंचालनस्यावश्यकता

❑ **श्रीमती आराधना धर्माधिकारी**

गृहे सर्वासु सुखसुविधासु सत्स्वपि अङ्गसंचालनं परमावश्यकम्? मम गृहे आसीत्सर्ववस्तूनां सुख-सुविधानां संग्रहः। भ्रमणार्थं मरुत्तरयानं बाइकयानं द्वे द्विचक्रिके। किञ्चिद्दूरार्थं गन्तुमहं मरुत्तरयानस्यै-वोपयोगमकरवम्। गृहे सर्वे कथयन्ति स्म किञ्चिदङ्ग-संचालनं कुरु, अन्यथा अङ्गानि संचलनं विस्मरिष्यन्ति परं नावहितं मया।

यदा वृत्त्यर्थं बहिर्गतस्तत्रापि मरुत्तरयानं दोलायन्त्रा-दिकमासीदेव। एकस्मिन् दिने विद्युदवरोधेन कार्यालये दोलायन्त्रं न चलितम्। सोपानमार्गेण गन्तव्यमभवत्। स्थूलशरीरत्वात्कथमपि सप्तदशे तले कार्यालये सम्प्राप्तः। सर्वेष्वङ्गेषु पीडा संजाता। स्वास्थ्येऽपि दुर्बलता समागता। तदा मयावगतमङ्गसंचलानाभ्यास आवश्यकः। तत एव प्रतिदिनं धावनमङ्गव्यायामश्च प्रारब्धः। अङ्गानां स्थूलता न्यूना जाता स्फूर्तिरपि समागता-

**व्यायामपुष्टगात्रस्य नित्यं वृद्धोपसेविनः।**
**चत्वारि तस्य वर्द्धन्ते आयुर्विद्या यशो बलम्।।**

218, धर्माधिकारिभवनं, ब्रह्मपुरी, जयपुरम्

आयुर्वेद-स्तम्भः

# हेमन्ते चीयते श्लेष्मा

❑ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः

**हेमन्तो ग्रीष्मो वर्षाश्चेति शीतोष्णवर्षलक्षणास्त्रय ऋतवो भवन्ति। तेषामन्तरेष्वितरसाधारणलक्षणास्त्रय ऋतवः प्रावृट्शरद्वसन्ताश्च भवन्ति। सर्वं यथातथं नियमानां परिपालनपूर्वकमपि सेवमानानां जनानां-शरीरेषु ऋतुप्रभावान्नियतस्य दोषस्य क्रमशः सञ्चयः प्रकोपः प्रशमश्च भवति। तत्र कालप्रभावात् ग्रीष्मे सञ्चीयते वायुः अर्थात् कफप्रशमके ग्रीष्मे वातचयः पित्तचयकाले वर्षाकाले तु तस्य वातस्य कोपः शरदि पित्तस्य प्रकोपकाले च वातप्रशमो भवति, एवमेव वर्षासु चीयते पित्तं शरत्काले तु कुप्यति, हेमन्ते तु कालप्रभावात् पित्तप्रशमः स्वत एव सञ्जायते। हेमन्ते कफस्य चयः वसन्ते कफस्य चयः वसन्ते तु कफप्रकोप एव परं भवति किन्तु कालप्रभावात्कफप्रशमो भवति ग्रीष्मे।**

हेमन्त, ग्रीष्म एवं वर्षा ये शीत, उष्ण और वर्षा के लक्षणों वाली 3 ऋतुएँ होती हैं, इनके मध्य में दूसरी तीन साधारण लक्षणों वाली ऋतुयें प्रावृट्, शरद् एवं वसन्त होती हैं। सब कुछ वैसा का वैसा ही नियमों के परिपालनपूर्वक सेवन करने वाले लोगों के शरीरों में भी ऋतु के प्रभाव से नियत दोष का प्रकाश सञ्चय, प्रकोप और प्रशम होता है। इनमें काल के प्रभाव से ग्रीष्म ऋतु में वायु का सञ्चय होता है अर्थात् कफ का प्रशमन करने वाले ग्रीष्म में वात का सञ्चय और पित्त के सञ्चय के काल वर्षा में तो उस वात का प्रकोप तथा शरद् ऋतु में पित्त के प्रकोप काल में वात का प्रशमन होता है इसी प्रकार से वर्षा में पित्त का सञ्चय होता है और शरद् काल में तो उसका प्रकोप होता है।

हेमन्त ऋतु में काल के प्रभाव से पित्त का प्रशमन अपने आप ही हो जाता है। हेमन्त ऋतु में कफ का सञ्चय होता है तथा वसन्त में तो कफ का प्रकोप ही होता है किंतु काल के प्रभाव से ग्रीष्म ऋतु में कफ का प्रशमन हो जाता है।

**ऋतुष्वेषः सञ्चयादिक्रमः सोमसूर्यानिलप्रभावादृतुचर्यानुरूपमाहार-विहार-सेवनञ्च सम्पद्यते। आचार्यश्चरकः कथयति यत्-**

**अद्भिरोषधिभिश्चैव मधुराभिश्चितः कफः।**
**हेमन्ते, सूर्यसन्तप्तः स वसन्ते प्रकुप्यति।।**

(च.चि. 3/45)

ऋतुओं में यह सञ्चयादि क्रम चन्द्रमा, सूर्य एवं वायु के प्रभाव से एवं ऋतुचर्या के अनुरूप आहार- विहार का सेवन करने से होता है। आचार्य चरक कहते हैं कि- पानी के मधुर स्वरूप तथा औषधियों के मधुर स्वरूप के कारण (मधुर आहार आदि के सेवन करने से) हेमन्त ऋतु में सञ्चित हुआ कफ वसन्त ऋतु में सूर्य से संतप्त हुआ वह (सञ्चित कफ) प्रकुपित होता है।

**हेमन्ते स्निग्धानां मधुररसप्रधानानां मेद्यानां गरिष्ठानां पुष्टिकराणाञ्चान्नपानादीनां सेवनङ्कुर्वन्ति जनाः, ऋतुचर्यापालनक्रम आवश्यकमप्येतदन्नपानादीनां सेवनम्। किन्त्वनेन धात्वादीनां पोषणेन सहैव दोषात्मकस्य कफस्यापि सञ्चयो भवत्येव, अत एव अन्नपानादिभिः सहैव कफसञ्चयापहारकाणां द्रव्याणामौषधानामपि प्रयोगस्तत्र परमावश्यकः। अत्रेदमप्यवधेयं यत्प्रयुज्यमानानि द्रव्याणि कर्शनानि वाताभिवृद्धिकराणि न भवेयुः।**

हेमन्त में स्निग्ध, मधुररसप्रधान, मेदोधातु को बढ़ाने वाले, गरिष्ठ तथा पुष्टि करने वाले अन्नपान इत्यादि का लोग सेवन करते हैं, ऋतुचर्या के पालन क्रम में इस तरह

के अन्नपान आदि का सेवन आवश्यक भी है, किंतु इससे धातु इत्यादि के पोषण के साथ ही दोषात्मक कफ का भी सञ्चय होता ही है, इसलिए अन्नपान आदि के साथ ही कफ के सञ्चय को दूर करने वाले द्रव्यों का एवं औषधियों का प्रयोग इस ऋतु में परमावश्यक है। यहाँ पर यह भी ध्यान रखने योग्य है कि प्रयुक्त किए जाने वाले द्रव्य कर्शन करने वाले अर्थात् कृश करने वाले और वात की वृद्धि करने वाले नहीं होने चाहिए।

**अत्र केषाञ्चिदेतादृग्विधानां द्रव्याणामुल्लेखः क्रियते येषां प्रयोगेण पुष्टिर्भवति शारीरधातूनां दोषात्मकस्य च श्लेष्मणः क्षपणं भवति, तेन हि तस्य सञ्चय एव न भवति। आचार्यः सुश्रुतः निर्दिशति यत्-**

**सञ्चयेऽपहृता दोषा लभन्ते नोत्तरागतीः।**
**ते तूत्तरासु गतिषु भवन्ति बलवत्तराः।।**

(सु.सू. 21/37)

यहाँ इस तरह के कुछ द्रव्यों का उल्लेख किया जा रहा है जिनके प्रयोग से शरीर के धातुओं की पुष्टि होती है तथा दोष स्वरूप श्लेष्मा का क्षय होता है, जिससे निश्चित रूप से ही उस कफ का सञ्चय ही नहीं होता है। आचार्य सुश्रुत निर्देश करते हैं-

सञ्चय काल में दूर किए गए दोष आगे की गतियों को प्राप्त नहीं करते हैं, यदि ऐसा नहीं किया जाए तो वे बाद की गतियों में अधिक बलवान् हो जाते हैं।

**सञ्चितानां दोषाणामपहरणं यद्युचिते समये क्रियते तदा तु ते सञ्चिता दोषाः प्रकोप-प्रसर-स्थानसंश्रय-व्यक्ति-भेदात्मिका उत्तरा गतीः न लभन्ते। तेषां दोषाणामपहरणं तु बहुदोषे शोधनेन, मध्यदोषे लङ्घनपाचनाभ्यां, अल्पदोषे च संशमन-माध्यमेनैव समुचितम्। अत्रोल्लेखनीयमस्ति यद् द्विविधे सञ्चये विशिष्टेन दोषप्रकोपकहेतुसेवनेन यः सञ्चयो भवति तत्र तु संशोधनाख्यो विधिरुक्तः, यस्तु सञ्चयो यथर्तुविधिसेविनः, तत्र तु स्वस्थवृत्तविधिना संशमनं कार्यम्।**

सञ्चित दोषों का अपहरण यदि उचित समय में किया जाता है तब तो वे सञ्चित दोष प्रकोप-प्रसर-स्थान संश्रय-व्यक्ति-भेदस्वरूपक आगे की गतियों को प्राप्त नहीं करते है। सञ्चय सहित दोषों की ये 6 गतियाँ होती हैं। उन दोषों का अपहरण तो बहुदोष में (अधिक दोष में) शोधन से, मध्य दोष में लङ्घन पाचन से एवं अल्प दोष में शमन के माध्यम से ही उचित है, यहाँ पर उल्लेखनीय है कि दो प्रकार के सञ्चय में विशिष्ट दोष प्रकोपक हेतु के सेवन से जो सञ्चय होता है उसमें तो संशोधन नामक विधि कही गई है, लेकिन जो सञ्चय ऋतु की विधि के अनुसार सेवन करने वाले व्यक्ति के होता है तो वहाँ पर तो स्वस्थ वृत्त की विधि के सेवन के द्वारा ही संशमन किया जाना चाहिए।

**अत एव यथर्तु विधिसेवनक्रम एव सञ्चयाप-हरणकर्तॄणां द्रव्याणां सेवनं करणीयम् हेमन्त-शिशिरयोः यदा कदा पिप्पलीसेवनं कर्तव्यम्। रात्रौ पिप्पल्यौ दुग्धे निक्षिप्य समुत्क्वाथ्य ते पिप्पल्यौ भक्षयित्वा तद्दुग्धं पिबेत्।**

**1. एवमेव छुहारानामधेयौ संशुष्कौ पिण्डखर्जूरौ दुग्धे निक्षिप्य समुत्क्वाथ्य तद्दुग्धेन सहैव भक्षणीयौ।**

**2. अहिफेनस्य बीजानि खस-खसनामतः प्रसिद्धानि (पोस्त के दाने इति लोके) दशग्रामपरिमितानि गृहीत्वोपर्युक्तेन विधिनैव दुग्धे निक्षिप्य समुत्क्वाथ्य पिबेत्।**

इसलिए ऋतु के अनुसार ऋतु की विधि के सेवन के क्रम में ही सञ्चय का अपहरण करने वाले द्रव्यों का सेवन करना चाहिए-

हेमन्त एवं शिशिर इन दोनों ऋतुओं में यदा कदा पिप्पली सेवन करना चाहिए। रात में दो पिप्पलियों को

दूध में डाल कर उबाल कर उन दो पिप्पलियों को खा कर वह दूध पीना चाहिए।

1. इसी प्रकार से छुआरा नाम से सूखे हुए दो पिण्ड खजूर को दूध में डाल कर उबाल कर उस दूध के साथ ही खाने चाहिए।

2. अफीम के बीज जो कि खसखस के नाम से प्रसिद्ध हैं उन्हें 10 ग्राम की मात्रा में लेकर उपर्युक्त विधि से ही दूध में डालकर उबाल कर पीना चाहिए।

**3. आर्द्रकामलकाभ्यां सहार्द्रां हरिद्रां यथारुचिं सम्मेल्य संक्षोद्य च घृते सम्यक् भर्जितामभर्जितां वा मात्रापूर्वकमेव भोजनेन सह भक्षयेत्।**

**4. 100 ग्राम परिमितामार्द्रां हरिद्रामार्द्रकमपि च तन्मात्रकमेव गृहीत्वा सम्पेष्य 100 ग्राम परिमिते घृते सम्यक् भर्जनं कृत्वा तत्र 200 ग्राम परिमितं गुडं प्रक्षिप्य विधिना पाको विधेयः पाकस्यास्य भक्षणं 10 ग्रामात्मिकायां मात्रायां करणीयमुष्णोद-कानुपानेन विंशतिदिवसपर्यन्तम्। श्वासकास-प्रतिश्यायग्रस्तास्तु जना अधिककालपर्यन्तमप्यस्य प्रयोगं कर्तुं शक्नुवन्ति। विरम्य विरम्य च स्वस्था अपि जना यद्यस्य प्रयोगं कुर्वन्ति तदा न तेषु हेमन्ते कफसञ्चयो भवति।**

**5. मेथिकाबीजानां विधिपूर्वकं शाकव्यञ्जनं विधाय प्रतिसप्ताहं वारमेकं वारद्वयं वा सेवनं कफहारकं प्रशमकञ्च भवति।**

3. अदरक एवं आँवले के साथ ताजा (आर्द्र) हरिद्रा अपनी रुचि के अनुसार एक जगह मिलाकर कूटकर घी में अच्छी प्रकार से भून कर या बिना भूने ही मात्रापूर्वक ही भोजन के साथ खानी चाहिए।

4. 100 ग्राम की मात्रा में आर्द्र (ताजा) हरिद्रा एवं अदरक भी उतनी ही मात्रा में अर्थात् 100 ग्राम लेकर अच्छी तरह पीसकर 100 ग्राम परिमाण में घी लेकर उसमें अच्छी प्रकार से भूनकर उसमें 200 ग्राम गुड़ डालकर विधिपूर्वक पाक करना चाहिए। इस पाक का 10 ग्राम की मात्रा में उष्णोदक के अनुपात से भक्षण करना चाहिए। श्वास, कास एवं प्रतिश्याय से पीड़ित लोग अधिक काल तक इसका प्रयोग कर सकते हैं। बीच-बीच में छोड़-छोड़ कर स्वस्थ व्यक्ति भी यदि इसका प्रयोग करते हैं तो उनमें हेमन्त ऋतु में कफ का सञ्चय नहीं होता है।

5. मेथी के बीजों का विधिपूर्वक शाक बना कर सप्ताह में एक बार या दो बार सेवन करने पर वह कफ को दूर करने वाला एवं कफ का प्रशमन करने वाला होता है।

**6. ग्रामैकां संशुष्कां पुष्टिकां हरिद्रामुष्णे दुग्धे निक्षिप्य पिबन्ति ये जना न तेषु कफसञ्चयो भवति हेमन्ते।**

**7. प्रसिद्धस्य च्यवनप्राशस्य नियमितं सेवनं कफापहारकं पुष्टिदञ्च भवति।**

**8. गोजिह्वादिक्काथस्य सेवनं वैद्यपरामर्शेन यः करोति निर्भयः सः श्लेष्मणा पीडितो न भवति।**

**9. स्वर्णवसन्तमालती-सुवर्णवसन्तकुसुमाकर-बृहद्वातचिन्तामणि-श्वासकासचिन्तामणीत्यादीनां स्वर्णभस्मसंयुक्तानामन्येषाञ्चोपयुक्तानां योगानां सेवनं हेमन्ते शिशिरे च चिकित्सकस्य परामर्शेन करणीयम्, रसायनस्वरूपा ह्येते योगाः बलवृद्धि-कराः पुष्टिदाः दोषात्मकस्य चापहारकाः सन्ति।**

6. 1 ग्राम सूखी हुई एवं अच्छी प्रकार से पीसी हुई हरिद्रा को गर्म दूध मे डालकर जो लोग पीते हैं उनमें कफ का सञ्चय हेमन्त में नहीं होता है।

7. प्रसिद्ध च्यवनप्राश का नियमित सेवन कफ को दूर करने वाला एवं पुष्टि प्रदान करने वाला होता है।

8. गोजिह्वादिक्काथ का सेवन वैद्य के परामर्श से जो करता है वह निर्भय व्यक्ति श्लेष्मा से पीड़ित नहीं होता है।

9. स्वर्णवसन्तमालती-सुवर्णवसन्तकुसुमाकर-बृहद्वातचिन्तामणि-श्वासकासचिन्तामणि इत्यादि स्वर्ण भस्म संयुक्त योगों का एवं अन्य उपयुक्त योगों का सेवन हेमन्त में एवं शिशिर ऋतु में चिकित्सक के परामर्श से करना चाहिए। रसायनस्वरूप ये योग बलवृद्धि करने वाले एवं पुष्टि प्रदान करने वाले तथा दोषस्वरूप कफ को दूर करने वाले होते हैं।

**10. पिण्ड खर्जूराणां नियमितं सेवनमपि कफसञ्चयं बाधते।**

**11. नारिकेल-वाताद-अक्षोट-मुकूलक (अकोल)-प्रियालेत्यादीनां संशुष्कफलानाम-न्येषामौत्तरापथिकानाञ्च प्रयोगः सुखदो भवति शीते।**

**12. ग्रामैकमात्रां त्वचं संगृह्योष्णोदके प्रक्षिप्य यो जनः पिबति यदा कदा शीतकाले तस्य प्रदीप्तो जठराग्निः गृहीतानां मधुरादिद्रव्याणां सम्यक् पाचनं करोति, न ह्यवकाशो वर्तते तत्र दोषात्मकस्य कफस्य वृद्धेः। यतो हि दारुसितास्वाद्वी तिक्ता चा-निलपित्तहृदुक्ता तथा सुरभिः शुक्रलावण्यामुख-शोषतृषापहा त्वगग्निदीपनी भवति।**

**13. विश्वोपकुल्यामरिचात्मकानि त्रीणि द्रव्याणि कटुरसात्मकान्युष्णवीर्याण्यग्निदीपकानि कफहराणि च भवन्ति, नागरन्तु बल्यमपि भवत्यत एवैतेषामुचितायां मात्रायां प्रयोगः शीतकाले विरम्य विरम्य करणीयः, उष्णवीर्यत्वान्निरन्तरन्त्वेतेषां प्रयोगोऽपायात्मको भवति, नियमितरूपेणापि स्वस्था रुग्णाश्च जना रसायनसेवनं कर्तुं शक्नुवन्ति चिकित्सकस्य परामर्शेन। यदा-कदाऽवधानतया प्रयुज्यमानानि त्वेतानि द्रव्याणि कफापहारकाणि दीपनानि श्वासकासहराणि भवन्त्यत एव सुखदानि भवन्ति।**

10. पिण्ड खर्जूरों का नियमित सेवन भी कफ सञ्चय को बाधित करता है।

11. नारियल, बादाम, अखरोट, पिस्ता, चिरौंजी इत्यादि सूखे फलस्वरूपक मेवे तथा अन्य ऐसे ही औत्तरापथिक संशुष्क फलों का प्रयोग सुखदायी होता है।

12. 1 ग्राम मात्रा में दालचीनी को लेकर गर्म जल में डालकर जो व्यक्ति यदा कदा पीता है उसकी प्रदीप्त जठराग्नि ग्रहण किए गए मधुर इत्यादि द्रव्यों का सम्यक् पाचन करती है। वहाँ पर ऐसी स्थिति में दोषस्वरूप कफ की वृद्धि का कोई अवकाश नहीं रह जाता है, क्योंकि दालचीनी मधुर रस वाली, तिक्तरस वाली तथा वायु एवं पित्त को दूर करने वाली कही गई है एवं सुगंधित यह दालचीनी शुक्र को बढ़ाने वाली, वर्ण को श्रेष्ठ करने वाली तथा मुखशोष एवं तृषा को दूर करने वाली तथा अग्नि को प्रदीप्त करने वाली होती है।

13. सोंठ, पिप्पली एवं मरिच स्वरूप ये तीन द्रव्य कटु रस वाले, उष्णवीर्य वाले एवं अग्निदीपक तथा कफ का हरण करने वाले होते हैं। सोंठ तो बल प्रदान करने वाली भी होती है, इसलिए उचित मात्रा में इसका शीतकाल में प्रयोग बीच-बीच में छोड़-छोड़ कर करना चाहिए, नियमित रूप से भी रसायन सेवन के रूप में इसका प्रयोग चिकित्सक के परामर्श से स्वस्थ एवं रुग्ण व्यक्ति कर सकते हैं। त्रिकटु का उष्ण वीर्य वाला होने के कारण (इन तीनों का) निरंतर प्रयोग हानिकारक होता है। यदा-कदा सावधानी से प्रयुक्त किए गए ये द्रव्य कफ को दूर करने वाले, अग्नि को दीप्त करने वाले एवं सुख प्रदान करने वाले होते हैं।

**14. विश्वोपकुल्यामरिचम् एतानि त्रीणि सम्मिलितानि द्रव्याणि त्रिकटुनाम्ना व्यवह्रियन्ते, कटुत्रिकं तु त्रिकटु त्र्यूषणं व्योष उच्यते। एतत्त्र्यूषणं दीपनं श्वासकासत्वगामयान्गुल्ममेहपीनसकफस्थौ-ल्यमेदः श्लीपदांश्च हन्ति। अत एव मिलितानामेषां त्रयाणामथवैकैकेषां प्रयोगोऽवधानतया शीतकाले विरम्य विरम्य करणीयः।**

**15. ग्रन्थिकापरनामधेयस्य पिप्पलीमूलस्य ग्रामैकमात्रस्यार्धग्रामपरिमितस्य वा दुग्धे समुत्क्रथनं कृत्वाऽगालितमेव तद् दुग्धं पिबेदेककालं रात्रावेव शयनकाले। एतद् पिप्पलीमूलं कटूष्णं दीपनं पाचनं लघु च भवति, कफवातोदरापहमेतद्रूक्षं पित्तकरञ्च भवत्यत एवाधिकः प्रयोगोऽपायात्मको भवति। मात्रया भिषङ्गिनर्देशेन प्रयुक्तमेतत्कणामूलमाना-हप्लीहगुल्मघ्नं कृमिश्वासक्षयापहञ्च भवति।**

**16. हेमन्ते शिशिरे चैव वैद्यपरामर्शेन पञ्चकोलसिद्धं दुग्धं कषायं वा किञ्चित्कालपर्यन्तं पिबेत्, अस्याप्यधिकः प्रयोगः रूक्षत्वमुत्पादयति शरीरे पित्तकोपनञ्च करोति। पिप्पली पिप्पलीमूलं चव्यचित्रकनागरैः पञ्चभिः कोलमात्रं ( पञ्चग्राम परिमितं ) यत्सम्मिश्रणं भवति तत् पञ्चकोलम् इत्युच्यते। पञ्चकोलं रसे कटुकं पाकेऽपि च कटुकं रुचिकृन्मतम्। एतद्धि तीक्ष्णोष्णं पाचनं तथा श्रेष्ठं दीपनं कफवातनुच्च भवति। युक्तिपूर्वकं प्रयुक्तमिदं पञ्चकोलं गुल्मप्लीहोदरानाहशूलघ्नं भवति।**

**17. एतान्यन्यानि चोष्णवीर्याणि द्रव्याणि विधिना प्रयुक्तानि कफापहारकाणि सन्ति तानि शीतकाले प्रयोक्तव्यानि। तेन हेमेन्ते कफसञ्चय एव न भवति, यथर्तुविधिसेवनक्रमेऽपि कदाचिद्यः कफसञ्चयस्य हेतुत्वमुपपद्यते स त्वपह्रियते विधिपूर्वकं प्रयुक्तैरेभिर्हेतुभिः।**

14. सोंठ, पिप्पली एवं मरिच ये तीनों सम्मिलित द्रव्य त्रिकटु नाम से कहे जाते हैं, इसे कटुत्रिक, त्रिकटु त्र्यूषण एवं व्योष कहा जाता है। यह त्र्यूषण दीपन होता है तथा श्वास-कास तथा त्वचा के रोगों को एवं गुल्म-प्रमेह-पीनस-कफ का पृथक्पृथक्प्रयोग सावधानीपूर्वक शीतकाल में बीच में छोड़-छोड़ कर करना चाहिए।

15. ग्रन्थिक दूसरा नाम है जिसका ऐसे पिप्पली मूल का 1 ग्राम की मात्रा में लिए हुए का दूध में उत्क्रथन करके बिना छाने ही रात्रि में ही केवल एक समय में ही उस दूध को सोते समय पीना चाहिए। यह पिप्पलीमूल कटु, उष्ण, दीपन, पाचन एवं लघु होता है, कफ दोष, वात दोष एवं उदर रोगों को दूर करने वाला यह रूक्ष होता है और पित्त को उत्पन्न करने वाला होता है, इसलिए इसका अधिक प्रयोग हानिकारक होता है। मात्रापूर्वक वैद्य के निर्देश से प्रयुक्त किया गया यह पिप्पलीमूल आनाह, प्लीह रोग एवं गुल्म रोग को नष्ट करता है तथा कृमि रोग, श्वास रोग एवं क्षय रोग को दूर करने वाला होता है।

16. हेमन्त एवं शिशिर ऋतु में वैद्य के परामर्श से पञ्च कोल सिद्ध दूध को या उसके क्वाथ को कुछ समय तक पीना चाहिए। इसका भी अधिक प्रयोग शरीर में रूक्षता उत्पन्न करता है।

पिप्पली, पिप्पलीमूल, चव्य, चित्रक एवं नागर (सोंठ) इन पाँचों को एक कोल की मात्रा में अर्थात् 5 ग्राम की मात्रा में मिलाकर जो संमिश्रण होता है उसे **पञ्च कोल** कहा जाता है। यह पञ्चकोल रस में कटु और पाक में भी कटु होता है तथा इसे रुचिकर माना गया है। यह तीक्ष्ण, उष्ण, पाचन तथा श्रेष्ठ दीपक एवं कफ तथा वात को नष्ट करने वाला होता है। युक्तिपूर्वक प्रयुक्त किया गया यह पञ्चकोल गुल्म, प्लीह रोग, उदर, आनाह एवं शूल को नष्ट करने वाला होता है।

18. ये सभी द्रव्य एवं अन्य उष्ण वीर्य द्रव्य विधिपूर्वक कफ को दूर करने वाले होते हैं। इन्हें शीतकाल में प्रयुक्त करना चाहिए, इसके कारण हेमन्त में कफ सञ्चय ही नहीं होता है। ऋतुचर्या की विधि के अनुसार सेवन के क्रम में भी यदि कभी जो कफ का सञ्चय का हेतुत्व उत्पन्न होता है वह भी विधिपूर्वक प्रयुक्त किए गए इन द्रव्यों के द्वारा दूर कर दिया जाता है।

**80, सेनापति हाउस के पीछे**
**प्रेमनगरम्, झोटवाड़ा, जयपुरम्**

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/405/2018-20

हार्दिक शुभकामनाओं सहित :-

निर्माता

# ए इन्फ्रास्ट्रक्चर लिमिटेड

## एस्बेस्टोस सीमेन्ट पाइप्स

सस्ता, मजबूत एवं टिकाऊ

सर्वोत्तम 'माजा' तकनीक द्वारा निर्मित पेयजल, कृषि, बोरवैल, सीवरेज एवं ड्रेनेज में उपयोगी तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ

एवं

निर्माता

## एस्बेस्टोस सीमेन्ट शीट्स

छत एक, लाभ अनेक

उच्च गुणवत्ता की फाइबर सीमेन्ट की नालीदार चादरें

कारखाना : हमीरगढ़ - 311025, जिला भीलवाड़ा (राजस्थान) दूरभाष: 01482-286102-07
दिल्ली कार्यालय : ए-९ए, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26961849/26965673
जयपुर कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड, जयपुर-302001 फोन: 0141-4019691/2370566
ईमेल आईडी : jaipur@kanoria.org (Pipe Dn.), sharma.ashok@kanoria.org (Sheet Dn.)

## राष्ट्रीय विचारों के लिए पढ़ें

(हिन्दी) साप्ताहिक
पाञ्चजन्य

(English) Weekly
ORGANISER

हमारी विशेषताएं



- राष्ट्रीय दृष्टिकोण
- 7 दशकों से लगातार प्रकाशित
- संसद तथा विधानसभाओं को गुंजायमान करने वाली पत्रिकाएं
- विश्वसनीय, प्रतिष्ठित, दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई-पेपर की सुविधा



**You can subscribe Panchjanya/Organiser Weeklies online through our Websites: www.panchjanya.com, www.organiser.org**

वार्षिक ग्राहक शुल्क

भारत में ₹ 700/- पाञ्चजन्य • ₹ 800/- ORGANISER (साधारण डाक द्वारा)
विदेशों में $ 80 (विदेशों में हवाई डाक द्वारा)

**प्रसार विभाग**
**भारत प्रकाशन (दिल्ली) लिमिटेड**
2322, संस्कृति भवन, लक्ष्मी नारायण गली, पहाड़गंज, नई दिल्ली- 110055
फोन : 011-47642000,01,02, ई-मेल: circ@bpdl.in

स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम्
अध्यक्ष: शंकरप्रसादशुक्ल: प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा श्याम प्रिन्टर्स, किशनपोल बाजार, जयपुरम्
दूरभाष: 0141–4001974 पत्रसंकेत:– भारतीभवनम्, बी–15, न्यू कॉलोनी, जयपुरम्–302001
दूरभाष: 0141–2379014

प्रतिष्ठायाम्,